कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2375
04/03/15

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2375 विषय दर्शनशास्त्र

नाव प्रमीनाखरी टिका

लेखक/लिपीकार —

पृठ 122 काळ [✓ पूर्ण]/अपूर्ण

प्रमिताक्षरी टीका

प्र.मि.टी.ग. त्वाच्य२ परेणाथ१

ॐ सिद्धिः श्रीगणेशाय नमः श्रीकृष्णाय नमः मंगल प्रकरणं समाप्य मंगलस्य सफलत्वसाधकप्रमाणादिकमभिधाय एतेनानंतर्यं प्रारणार्थशब्देन तदभिधानानं
१ सुच्यतेद तर्यं प्रयोज्यत्वमाह दृशप्रमाणाद्याकांक्षानिवृत्तिं शप्य तादृशप्रमाणादिज्ञानसिद्धत्वे स्वस्य संगतिप्रदर्शकत्वमप्यथशब्दस्योपपद्यते इह जिज्ञासितत्वम्। प्रेक्षावत्प्रवृत्तेरिति निः
श्रेयसाधकफले तुच्छत्वधीमतां प्रवृत्तिप्रयोजकज्ञानविषयेऽसमर्थः। निःश्रेयसफलवदान्वीक्षिकीसंबंधस्य निःश्रेयसप्रयोजकप्रमाणादितत्त्वज्ञानजनकज्ञानविषयान्वी
क्षिकीप्रतिपादितप्रमाणतत्त्वबोधकज्ञानविषयत्वरूपस्य निःश्रेयसार्थिप्रवृत्तिजनकज्ञानविषयत्वं निःश्रेयससाधनत्वहेतुतया तज्ज्ञानस्य तादृशप्रवृत्तिप्रयोजकत्वं बो अनुमा
ध्यम्। यद्यपि प्रमाणतत्त्वबोधकत्वमात्रस्यैव निःश्रेयसप्रयोजकत्वहेतुतया प्रतिपादितत्वात् विशेषणवैयर्थ्यम्। तथाप्यान्वीक्षिकीप्रमाणतत्त्वप्रतिपादकत्वं निःश्रेयस
कज्ञानविषयत्वयोग्यान्वीक्षिकीग्रहार्थं प्रमाणतत्त्वप्रतिपादितत्वात्कथनं प्रदर्शयन्निस्समस्तीपुग्रंथइत्यादि। तदभिधेयमान्वीक्षिकीप्रतिपादितप्रमाणतत्त्वमाह अभिधेया
याप्रतिपादयन्ति प्रदर्शयन्नित्यत्र लट्प्रत्ययेनाथेत्याद्यभिधानस्य तादृशसंबंधप्रदर्शनसमानकालीनत्वलाभादर्थतस्तत्तद्रूपलाभेन तदभिधानस्य शिष्यप्रवृत्त्युपयोगि ऽ२
ताप्राप्तेर्निष्फलत्वशंकाप्युदासः। नन्वित्याक्षेपो न मीमांसकस्य स्वतस्त्वपक्षेऽपि दूषणोद्भावनास्तोवोद्धव्यमेहाशंकापरतयाव्याचष्टे। माध्यमक इति। मूले प्रमाणतत्त्वाव

त्वह

श्रीराम
१

धारणास्य प्रमात्वस्यावधारणाधीनत्वमभिहितं तदुभयथैव प्रमाणानां स्वप्रमाकरणत्वरूपस्य प्रमात्वघटितत्वात् ज्ञानस्य विशेषणज्ञानविषयोपयोगात्। शास्त्राधीनप्रमाणानां स्वावधारणस्य शास्त्रज्ञानप्रवृत्त्यधीनतया प्रवृत्तौ च निश्चितप्रमात्वस्येष्टसाधनताज्ञानादेर्हेतुतयोपयोगाच्चात्र विशेषणज्ञानविषयोपयोगो किंचित्करः प्रमात्वघटितस्याप्यनुभवकरणत्वादेः प्रमाणसाधारणधर्मस्य संभवादिति प्रवृत्त्युपयोगितया प्रमात्वनिश्चयापेक्षायामेवाक्षेपनिर्भरः। तदुपरि प्रमात्वस्य दुरवधारणात्वमभ्युपेत्यापि शास्त्रस्य प्रमाणाणासाधारणधर्मप्रतिपादकत्वहानिः श्रेयसफलकत्वस्य प्रयादपत्तः अथ किमित्यादिना प्रवृत्तौ प्रमात्वनिश्चयानपेक्षाशंकेति स्फुटयति। नान्वति। अन्यथासिद्धेश्चेती सनंतरं प्रवर्त्तकज्ञाने प्रमात्वनिश्चयमंतरेणापि शास्त्रश्रवणोप्रवृत्तिसंभवात्। शास्त्रस्य निःश्रेयसफलत्वसंभवइती विशेषः। न चैतादृशस्थले नन्यासिद्धत्वात्स्वाभों णपा निश्चयस्य प्रवर्त्तकत्वव्यवस्थापनं यद्यपि माध्यमकस्य नोपपद्यते। प्रमात्वस्य [illegible] ग्राह्यत्वं निराकुर्वतस्तस्यापि मते प्रमात्वनिश्चयस्य प्रवर्त्तकत्वाभावात्। तथापि नैयायिकादिभिर्व्यासिद्धत्वात्प्रमात्वनिश्चयस्य प्रवर्त्तकत्वमुपगंतव्यम्। वश्यमेवं केषां तथैव सिद्धांतात्। तद्वैवं संभवतीति शंकाभिप्रायः। संशयव्यतिरेकनिश्चयपर्यंतंत्सामान्यार्थकमवश्यं वाच्यम्। उदासीनपदार्थतद्व्यतिरेकगोचरस्यापि संशयादेः कस्यचित्समूहालंबनादिरूपविरोधिज्ञानात्मकस्य प्रतिबंधकतया व्यभिचारात्। तथा चव्य

प्रमो

ण्यर

त्यार

व्य॰मि॰टी॰ग॰
२

मात्र भिति मात्र १ य१ पद१

तिरेकज्ञानत्वेन व्यतिरेकज्ञानसामान्यनिवेशेनैव सामंजस्ये संशयत्वादिना निवेशनमनुपयुक्तमित्याशयेनाह स्वालोकेँ व्यतिरेकज्ञानेँ पदं कृत्स्नार्थकमेवं चँ पदव्यति
रेकज्ञानसामान्यप्रतिबध्यंतत्वनिश्चयजन्यमितिव्याप्तिः। पर्य्यवसितेति। न वैयधिकरण्यम्। नन्वेवं पृथगुभयोपादानविरोधइत्यतआह। सामान्येनेति। उभयसाधा
रणव्यतिरेकज्ञानत्वेन नियमप्रवेशलाभार्थमित्यर्थः। उभयम्। संशयनिश्चयोभयम्। यथाश्रुतमूलानुरोधिनः संशयत्वनिश्चयत्वोँभयवज्ज्ञानं निवेशयंति। न च तन्म भ्याउ
ध्येपि ज्ञानत्वनिवेशादितरांशवैयर्थ्यं संशयत्वादिव्यापकप्रतिबंधकतायानिवेशनीयत्वात्तादृशव्यापकतायाश्च ज्ञानत्वव्यापकतायामवच्छेदकस्याभावात्तरस्य प्र
वेशेन वैयर्थ्याभावात्। एतन्मतमवलंब्य प्रत्येकनियमद्वयगतेनोभयोपादानं सार्थकयति प्रत्येकनियमेत्यादिना प्रत्येकनियमे संशयव्यतिरेकनिश्चयोः पृथङ्निवेश
निपँतेपूर्वप्रथमे व्यतिरेकनिश्चयाव्यवहितनियमे व्यभिचारसंशयप्रतिबध्य इत्यस्य त्वव्याप्यसंशयस्याप्रतिबंधकत्वेपि व्यभिचारसंशयो व्याप्तिनिश्चयप्रतिबंधक इति मतमवलंब्य मद्ध्ये॰ मा॰ने॰२
दस्मा। व्याप्तिज्ञाने च व्यभिचारज्ञाने व्यभिचारादित्यस्य प्रथमेणान्वयः। व्यतिरेकनिश्चयनिवेशे च व्यभिचारव्यतिरेकनिश्चयस्याव्यभिचारज्ञानाप्रतिबंधकत्वाँ व्यभिचार इति भा
वः। द्वितीये संशयाव्यवहितनियमेपिपमे। निश्चयमात्रेति। मात्रपदेनायोग्यतासंशयव्यवच्छेदः। तेन संशयनिवेशे व्यभिचारनिराकरणासंभव इति सूचितमाग्रेयव्यतिरे

श्रीराम॰
२

ेकनिश्चयइत्यत्रयत्पदार्थयात्वभिन्नत्वविशेषणतासंनिवेशनीयत्तयात्वव्यतिरेकनिश्चयप्रतिबध्ये विशिष्टज्ञानमात्रे व्यभिचारो न बाध्यते इति शाब्दविशिष्टज्ञानपर्यन्तानुधाव
नम्। योग्यतो चेकपदार्थेऽपरपदार्थनिष्ठाभावप्रतियोगित्वं तस्य च यात्वभिन्नतया तद्व्यतिरेकनिश्चयप्रतिबध्यत्वमादाय व्यभिचार उक्तविशेषणदानेप्यसंगतमेवेति भावः। ए ८२
वं संशयपदादाने फलोपधानव्यतिरेकनिश्चयमात्रप्रतिबध्यतानिश्चयजन्यायाः प्रवृत्तावपि व्यभिचारो बोध्यः। न तूक्तव्यावृत्तिरूप[illegible]दानमसंगतम्। अव्यभिचारस्याहाराद्वा के
८४ नचिद्रूपेण क्वाचित्कव्यभिचारादिनिश्चय[illegible]स्वरूपयोग्यत्वसत्त्वेन साध्यसत्त्वादित्यत आह। निश्चयत्वेनेति। जनकत्वस्य साध्यत्वं निरूपकतासंबंधेन बोध्यम्। जनकताप्रतियोगित्व
मेव वा जनकत्वपदेन विवक्षितमतो न प्रवृत्तिरूपपक्षे निश्चयत्वावच्छिन्नजनकताया अ[illegible]प्रवृत्तावपि बाधः। अनुमितौ परामर्शादिजनकतायां पक्षधर्मतावगाहित्वांशप्रामाण्यग्रहा
भावविशिष्टत्वादेरधिकस्यावच्छेदकत्वेपि निश्चयत्वपर्याप्तावच्छेदकताकत्वपर्यन्तानिवेशान्न दृष्टान्तासिद्धिः। ननु प्रामाण्यनिश्चयस्य प्रवृत्तौ पृथक्कारणत्वं नास्ति भाविज्ञा
नादौ प्रामाण्यनिश्चयेप्यप्रवृत्तेः। तन्न ज्ञानजन्यप्रवृत्तौ च तत्तज्ज्ञानधर्मिकप्रामाण्यपाननु प्रामाण्यनिश्चयस्य प्रवृत्तौ पृथक्कारणत्वं नास्ति भाविज्ञानादौ प्रामाण्यनिश्चयेप्यप्रवृत्तेः
। तन्न ज्ञानजन्यप्रवृत्तौ च तत्तज्ज्ञानधर्मिकप्रामाण्यनिश्चयत्वेन हेतुत्वे अनंतकार्यकारणभावप्रसंगादिति विषयतासंबंधेन प्रामाण्यनिश्चयविशिष्टार्थज्ञानत्वेनैव हेतुतात

सेव२

धा

निवर्त्तनद्वारा प्रामाण्य ४

थाचजनकतावच्छिन्नसाध्यव्यभिचारः स्यात ग्राह्यनिश्चयाभाववृत्तितामते गृहीताप्रामाण्यकज्ञानत्वेन प्रवर्त्तकत्वोपगमादेति प्रसंगभंगेन प्रामाण्यज्ञानस्य निश्चयत्वेनाहेतुत्वाद्दा
धइत्याशंक्यापक्षांतरमवतारणांतरमुक्तम् तेन रूपेणावर्त्तकत्वे प्रामाण्यज्ञानं हेतुतापानिर्युक्तिकत्वापातः सिद्धाप्रामाण्यशंकाविरहस्थाने प्रामाण्यनिश्चयं विनापि प्रवृत्तेर्हिती
(रुस्वगतेदेवाभावशाह यत्साध्येप्यंशतो वाधात्। पुंस्त्वं नरविरहेपि व्याप्तिवत्त्वात् प्रामाण्यज्ञानस्य हेतुत्वे निश्चयत्वेनापि हेतुतापातस्तद्दलेन निष्प्रयोजनतापातात्। सामानाधिकरण्येन साध्यसिद्धेह्रदेष्प
नांस्वीकृत्सांशतो वाधसाङ्कर्षणात्वापन्नावपि न प्रतीकारः। व्यभिचारशंकायाम सिद्धिमां प्रामाण्यनिश्चयस्यानुपयोगित्वेवस्थाप्यमाने अप्रामाण्यशंकोनिश्चयोपयोगितापा न्ये४
यासिद्धत्वेन साधनसंकायाश्च वतारियोगात्। यादृशी वोपयोगिता भिराक्रियते तत्साधनस्यो[illegible]पयुक्तत्वाशंकोच्छिन्नात्वात्। अनिपतनान्तमप्रामाण्यशंकाविरहदशोपयोगितापाच
व्यभिचारान्यथासिद्ध्योः किंचित्करत्वात् निराकरणस्याप्रकृतत्वात्। जनकतावच्छेदकत्वेनोपयोगित्वे अन्यथासिद्धिवा[illegible]पेक्षितत्वात्पानिश्चितप्रामाण्यकज्ञानत्वेन प्रवर्त्त तुष्यराहित्यात
कत्वमतावलंवनेनासंगतिः। न च व्यभिचारान्यथासिद्धिर्मां प्रामाण्यग्रहस्यापादकस्योपयोगिताभिराक्रियते तत्साधावधेन मासिसहस्त्रेणापि साधनसंभवइति मूलासंग न२
तिर्दुर्वारैवेतिवाच्यम्। प्रवृत्तिविशेषणा व्यभिचारः कारणतायाः प्रामाणिकत्वे चनान्यथासिद्धिरित्याशयेन तत्साधनसंगतेः निश्चयाभावेनाभावव्याप्तसमानाधिकरण

श्रीराम॰
३

२१

निश्चयानधिकरणक्षणानंतर्भूतत्वसत्त्वेः। अत्र प्रामाण्यनिश्चयपदश्यायामपि तदभाववत्सामान्यावच्छेदेन सत्त्वेपि स्वीयप्रामाण्यनिश्चयस्य निरुक्तयाप्रामाण्यनिश्चयसामान्यान
धिकरणक्षणाप्रसिद्धावपि प्रामाण्यनिश्चयनाशेपि प्रवृत्तिस्थितावपि न क्षतिः। इदं विवक्षितमिति। अन्यथेश्वरीयप्रामाण्यनिश्चयजन्यत्वमादाय सिद्धसाधनप्रसंगादि
ति भावः। न दोषः। नोक्तव्याहतिदानासंगतिः। अनुमाने सिद्धसाधनशंकयापि निश्चयत्वेनेत्यादि क्रमवतापि न दोषः। न सिद्धसाधनमिति व्याख्यानमयुक्तम्। अग्रे तन्न यथाश्रुतइ
त्यादिविवक्षाबीजप्रदर्शनविरोधाद्व्यभिचारप्रसक्तिं विहायेति। अव्यभिचारग्रहेपीति। व्यभिचारनिश्चयस्य क्वाचित्कव्यभिचारनिश्चयस्य प्रतियोगिज्ञानत्वेन तदुपलक्षणं अवि
शेषणाज्ञानतादिनेत्यपि बोध्यम्। हेतुत्वात्। स्वरूपयोग्यतातः। एतेनोक्तं स्खलप्रामाण्यग्रहे स्वतस्त्वपक्षोक्तप्रामाण्यसंशयानुपपत्तिरूपदोषव्यासा[illegible]हस्वमात्रदूषणागता
ग्रासादिसंसंगतेसादृश्योद्यायाः सैास्यायाद्धर्मिणामंतर्भाव्यज्ञानधर्मिकप्रामाण्यग्रहस्याप्रयोजकत्वे साध्यम्। तथा हि व्यभिचारज्ञानपूर्वे समानधर्मिकव्यभिचारनिश्चयस्य
विरोधेनासंभवेपि निश्चयतिरिक्तव्यवधेयम्। एतच्चोपलक्षणम्। क्वाचित्कप्रयोग्यता निश्चयस्य योग्यताज्ञानत्वेन स्वरूपयोग्यतामात्रप्रसादबोधे व्यभिचारासंभवो बोध्यः। साध्यव
हितपूर्ववर्तित्वसमानाधिकरणत्वविशिष्ट एकत्वरूपफलोपधानवति तत्साध्ये प्रयासस्तु तेपि व्याहतिदानसंगतिः। प्रवृत्तित्वावच्छेदेन सामानाधिकरण्यपर्यवसित तत्साधनेन

प्र॰ म॰ टी॰ ग॰
४

स्वंवा

कादाचित्कप्रामाण्यनिश्चयात्मकार्थनिश्चयजन्यत्वं भगवज्ज्ञानजन्यत्वमादायार्थान्तरादिदोषस्यापि नावकाश इत्याशयेनाह तावत्तु त इति। निश्चयत्वेन जनकत्वाविवक्षा
या मिस्तूपलक्षणम्। निश्चयाभावे अभावरूपतज्जन्यत्वाविवक्षायामपि दोषो ध्वौ संशयमात्रजन्ये तेन संशयानन्तरोत्पन्ननिश्चये न द्वितीयपक्षदोषोऽनिरस्तः स्यादिति। द्वितीयपक
दं२ ले व्यतिरेक निश्चयमात्रघटितनियमे इत्युपलक्षणं। संशयमात्रघटितनियमेऽपि व्यभिचारनिश्चये व्यभिचारनिश्चयनिरूपितफलोपहितजन्यताश्रये व्यभिचा संशयजन्ये २
रो बोध्यः। कथंचित्समानधर्मिकव्यभिचारनिर्णयस्य कादाचित्कव्यभिचारनिश्चयपूर्वं संभवेऽपि व्यक्तिविशेषे व्यभिचारस्यावज्ञलेपतात्। निश्चयविषयः व्यतिरेकप्रतियोगि
तया निश्चयविषयोपसर्गार्थः। तथा च स्वप्रकारभिन्नस्य स्वव्यतिरेकनिश्चयोपयत्नप्रतिबंधक इति वक्तव्यमिति भावः। यास्यप्रतियोगिकभिन्नत्वेनेति क्वचित्पाठः। तत्र निश्च
यविषयाव्यतिरेक एव व्याप्तिव्यतिरेकज्ञानेति। अव्यभिचारव्यतिरेकीयो व्यभिचारस्तत्संशयनिश्चयेत्यर्थः। अन्यथा व्याप्यसंशयस्यापि प्रतिबंधकत्वेऽपि अव्यभिचारनिश्चये तस्य प्र
तिबंधकत्वापगमादिति भावः। व्याप्तिज्ञान इति। अव्यभिचारनिश्चयाजन्यप्रतीतिशेषः। न व्यभिचार इति। अत्यन्ताभावादिघटितव्याप्तिज्ञाने अन्योन्याभावादिघटितव्यभिचा
शाम रस्य विरोधितानवगतीतिहृदयम्। अन्यथोक्तविरोधप्रदानेऽप्यप्रतीकारात्। अत्र च कल्पे व्यभिचारस्य संशयोपदर्शितप्रतिबंधकत्वात्सकलव्यभिचारज्ञानस्यैव सर्वविधाव्यभि

श्रीराम
४

चारज्ञानेविरोधित्वंमतिमंज्ञादिस्यायेनावश्यकंयात्साभावज्ञानविषयाव्यभिचारज्ञानस्याव्यभिचारज्ञानप्रतिबंधकत्वेयात्सांतराभाववैलक्षण्यापासंभवेनान्यत्रैपिसंशः वात्रा१
वि२ यप्रतिबंधकतानुपपत्तेरितियात्स्याभावेतवैकँथव्यभिचार(धी)प्रतिबंधेव्यन्यविधव्यभिचाराभावग्रहेव्यभिचारोद्धारेइत्यालोच्यग्रन्थेविशेषणानुपेक्ष्यप्रकारांतरेणाव्या भिन्नत्वे२
सिज्ञानेव्यभिचारमुद्धरिष्यन्नुक्तविशेषणपरित्यागेसंशयप्रदर्शविपरीतनिश्चयप्रतिबंध्यविशिष्टज्ञानमात्रेव्यभिचारवारणप्रयोजकत्वमेवसंभवतीत्याशयेनप्रथम
तस्तदेवाह।वस्तुतोपव्यतिरेकेति।व्याप्त्यभागेव्याप्त्यनिश्चयाजन्येवघटादिविशिष्टज्ञानमात्रेसंशयोपादानस्मात्रहेत्वव्यभिचारवारकत्वेऽतःसंशयेतीत्यनेनाभिहितेहेतुमा
ह।तत्रैवेति।तत्रघटादिविशिष्टज्ञानेव्यतिरेकविषयोपादानस्यकथितैवव्याहतिरित्याह।तावदिति।तावन्मात्रेयत्संशयःप्रतिबंधकइत्येतावन्मात्रेचस्त्वर्थःउपात्तमित्यनेनत
रंनेतुपादानेचेतिपूरणीयम्।तत्रव्याप्तिज्ञानेप्रतिबंधकतान्व्यभिचारइतिशेषः।यत्स्वदेवाव्यभिचारस्माहाप्याव्यभिचारज्ञानेदर्शितव्यभिचारमाशंक्यनिराकुरुते।नचेत्या
दिना।पद्भावत्वेति।नचप्रमेयत्वादिप्रकारेणव्याप्यभावावगाहिनिपक्षधर्मतादिविरहनिश्चयेव्याप्यभावत्वप्रकारकताविरहादनुमितिप्रतिबंकव्याप्यभावज्ञानेनव्या
प्यभावत्वप्रकारतानियमइतिदृष्टांतासिद्धिः।एवंकिंचित्वेनव्याप्याभावावगाहिनिष्कलससाध्यत्वादिनिश्चयेपरत्निबंधकेव्याप्याभावत्वप्रकारकताविरहात्त्व
प्रति२

अ·मि·टी·ग·
५

रूपासिद्धिस्थेतिवाच्यम्। यद्भावावगाहित्वप्रयुक्तस्वप्रतिबंधकताशालियत्संशयव्यतिरेकनिश्चययोर्यद्भाववैंप्रकारकत्वानियमइतिविवक्षणात्साध्यधर्मिताविरहा
दिनिश्चयत्वादिनाअनुमित्यादिप्रतिबंधकतायाअव्याप्यभावावगाहिताप्रयुक्तत्वान्नहृदसनुमित्सादिप्रतिबंधकव्याप्यभावावगाहिविज्ञानेतदभावत्वाप्रका
रकत्वेपिसत्तिविरहात्। अथैवंयद्भावावगाहिताप्रयुक्तप्रतिबंधकताशालिनिश्चयसंशयेयद्भाववत्वप्रकारकत्वानियमइत्येतावन्मात्रस्यैवसम्यक्त्वेतेनव्यतिरेकनिश्चयो
पादानव्याहतसंगतिः। व्यभिचारसंशयस्यव्यभिचाराभावावगाहिताप्रयुक्ताव्यभिचारज्ञानप्रतिबंधकत्वापोगात्। यत्सदेनव्यभिचारस्तुपादायतदभावज्ञानेउक्तसंशय
मात्रवृत्तिनहेतोःसत्वानिर्वाहात्। नचप्रयोजनाभावविरहेणप्रतिबंधकसंशयेयद्भाववत्वप्रकारकत्वानियमोनप्रवेश्यते। किंतुतादृशनिश्चयएवेतिनियमस्यसन्निवेशेननिश्चयां
शवैयर्थ्यमितिवाच्यम्। अनियततयोःसंशयविपर्ययोरितिलिखनेनसाध्याभिमतस्यव्यभिचारसंशयेव्यभिचाराभाववत्वप्रकारकत्वानियमकथनस्यचासंगतेरितिचेन्न। संशयस्य
यत्संशयत्वघटकविषयितायाप्रयुक्तप्रतिबंधकताश्रयत्वेननिवेशनीयत्वपाद्विपर्ययोपादानसार्थक्यात्। व्यभिचारविषयितायाअपिव्यभिचारसंशयत्वघटकत्वात्तत्
प्रयुक्तप्रतिबंधकताशालिसंशयस्यापियत्संशयपदेनोपादानसंभवात्। नचैवमप्येकदेशियद्भाववैंप्रकारकत्वानियमस्यप्रवेशेनैवोपपत्तौउभयत्रतदुपादानमसंगत

श्रीराम
५

मेवेति वाच्यम्। निपतत्वांतस्य संशये विपर्यये च वैकल्पिकविशेषणतानाभिप्रायेणात्तत्संगतेः। अन्यथा तत्प्रयुक्तत्वेनावच्छिन्नत्वं पक्षधर्म्मिताविरहत्वादिनाप्यसंभावाद्यवगाहिता
यापि पक्षधर्मताविरहत्वाद्यवच्छिन्नावगाहितात्वादिना पक्षधर्मताविरहादिज्ञानप्रतिबंधकतापामवच्छेदकत्वात्तस्या अपि तदवगाहिना प्रयुक्तत्वापत्तेः। असंभावत्वादिना अप्र
वगाहित्वांशेऽपि विरोधि तथा वास्तवतदभावावगाहितात्वेन तदभावावगाहितापा अवच्छेदकत्वविवक्षणात्संभवान्नात्र तत्र वैयाप्यत्वम्प्रयुक्तत्वांतिसाधारणप्रतिबंधकतापां नै२
तदसंभवात्। नापि व्यापकत्वं भ्रमेयत्वादिना विरोधिविषयकज्ञानेप्रतिबंधकत्वात्मत्वेन विरोधिविषयितापात्तद्व्यापैत्वादिरिति चेन्न। भ्रमान्यत्वेति पदभाववविषयितावच्छिन्नत्वनि कं४
वा वेशनेनानुपपत्त्यभावात्। ननु व्याप्त्यभावत्वादिप्रकारकत्वस्य मात्स्यभ्रौदिज्ञाननिष्ठप्रतिबंधकतावच्छेदककोटिनिवेश एवानुमित्यादिप्रतिबंधकव्याप्त्यभावादिज्ञानेन तत्प्रकारकता
नियमनिर्वाहसंभवः स एव कुतः इत्यत आह। अन्यथेति। अन्यथा तत्तत्प्रकारकत्वानिवेशेन तु व्यभिचारसंशये व्यभिचाराभाववत्ताप्रकारकेऽपि तु व्यभिचारसंशयत्ववद्घटकविषयिता
प्रयुक्ता व्यभिचारज्ञानप्रतिबंधकत्वसत्ताप्रयुक्तनियमाभावेन व्यभिचारसंशयमात्रस्यापि व्यभिचारज्ञाने व्यभिचारानवगाहित्वात्तद्व्यतिरेकनिश्चयोपादानमनर्थकमित्यत आह अस्तिचे
ति। व्यभिचाराभाववत्त्वप्रकारतानियम इति भावद्वयकोटिकसंशयानभ्युपगमादिति भावः। यदि एककोटिकोऽपि तत्संशयः प्रामाणिकस्तदा संशयनिष्ठप्रतिबंधकतायां मुख्यवि

द्वै

प्र.मि.टी.ग.
६६

द्वयं
८ यत्पदार्थभिन्नत्वंतादृशप्रकारतापन्नेविशेषणंतेनाव्यभिचारज्ञानेनव्यभिचारः१
या

शेष्यतानिरूपिताप्रकारतापन्नाशेप्रतियोगितायांकिंचित्प्रकारकत्वेनैयत्समेवविवक्षणीयम्॥ इदंतुसमाधिसौकर्येणाभावद्वयकोटिकसंशयोपगमेपिपदर्थावगाहित्वेन
त्व प्रयुक्तेंपदर्थावत्त्वाप्रकारकत्वनितोभयाभाववत्त्संशयादिनिष्ठप्रतिबंधकतासामान्यकत्वेनिवेश्य [illegible] विपर्ययोपादानसार्थक्यसंभवात्॥ अव्यभिचारनिश्चयेउक्तव्यभि-
चारएवंविवक्षणेनास्तीतिस्फुटयितुंतत्प्रतिबंधकेऽव्यभिचाराभावज्ञानेऽव्यभिचाराभाववत्त्वप्रकारतानियमंनिराकरोति॥ प्रकृतेचेति॥ अव्यभिचारज्ञानेऽव्यभिचारज्ञानंप्रती- प्रकृते
तियावत्॥ प्रतिबंधकत्वेस्थितेऽस्यतेनान्वयः॥ लाघवेनेति॥ एतेनव्यभिचारत्वप्रकारकज्ञानत्वेनस्वतंत्रप्रतिबंधकताकल्पनातोऽव्यभिचाराभाववत्त्वप्रकारकज्ञानंतत्रकल्प-
ितत्वेवाव्यभिचारज्ञानानुत्पादउपपादनीयइतिशंकानिराकृता॥ प्रतिबंधकज्ञानोत्तरकल्पनेनकार्यानुत्पादोपपादनेवंलाघवमविच्छिन्नज्ञानत्वेनप्रतिबंधकत्वकल्पि-
तानवच्छिन्नमेवकल्प्यतामितिवैपरीत्यमेवयुक्तमितिसूचनात्॥ तत्प्रकारकत्वेनेत्यनेनेतरमपिपूरणीयः॥ केचित्तु॥ तत्प्रकारकत्वेनेतिसावधारणमानचैवंपदर्थावत्त्वप्रका-
प्रकारकत्व रकसंशयनिश्चयसामान्यप्रतिबंधकमित्येतावतैवसामंजस्यम्॥ अव्यभिचाराभाववत्त्वेमात्रेणाव्यभिचारज्ञानस्याव्यभिचारनिश्चयप्रत्येतन्मतेप्रतिबंधकत्वाभावेनैवोक्त-
व्यभिचारानवकाशात्॥ इतिनियमोपादानमनर्थकमितिवाच्यम्॥ पदर्थावत्त्वप्रकारकतानियतयोरित्यस्यपदर्थावत्त्वप्रकारकताश्रययोरित्यर्थकत्वोपगमेननियमस्याप्रवेशा-

व्यभिचारत्वप्रकारकत्वेनर

श्रीराम.
६

गात् व्यभिचाराभावत्वप्रकारकतानियमइत्यत्रापि नियमपदस्याभ्रमत्वमात्रार्थकत्वादित्याहुः। तच्चिंत्यम्। एवं सत्यनुपदं नियमरूपस्याप्यव्यभिचाराभावाभावत्वाप्रकारकज्ञान
स्य प्रतिबंधकत्वाभिधानविरोधात्। व्यभिचाराभावाभावत्वमात्रप्रकारकज्ञानस्योक्तसंशयादिसामान्यांतर्गतस्याप्रतिबंधकतया एव वक्तुमुचितत्वात्। व्यभिचाराभावाभावत्वा
प्रकारके तन्मात्राप्रकारके एव निश्चये प्रतिबंधके सति तदभावात्। व्यभिचाराभावाभावत्वमात्रप्रकारकज्ञानस्य प्रतिबंधकत्वाभावेनोक्तहेतोर्व्यभिचाराभावादिसमग्रमप्र
र्थविरोधविशेष इति चेन्न। उक्तानुक्रमेणोक्तोपपत्तावीदृशप्रयासस्यायुक्तत्वात्। तथा च प्रतिबंधके सति तदभावात्। प्रतिबंधकज्ञाने तदभावत्वप्रकारकत्वनियमाभावादिति से कल
आ४ वाग्निमत्पक्षिकार्थमुदाहरणीयः। दृष्टांतासिद्धिमाशंकते। न चेति। अव्यभिचारात्मकतया व्याप्तेरिति। व्याप्तेर्व्यभिचारात्मकतयेति योजना। तदभावत्वप्रकारकतया व्याप्त्य
भावत्वप्रकारकत्वमात्रेण न तथात्वम्। नानुमितिप्रतिबंधकयानियतिरेकज्ञाने व्याप्यस्यभावत्वप्रकारकतानैयत्यसं तथा च महलोक्तदृष्टांतासिद्धिरिति भावः। तत्र। व्याप्तो विशेष्य
भूतस्येति शेषः। सामानाधिकरण्यभागस्य भावनयेति। स्वव्यभिचरितसामानाधिकरण्यस्य व्यापकसामानाधिकरण्यस्य वा व्याप्तित्वादिति भावः। तदभावत्वप्रकारकत्व
नैवेति। भावविरहस्य भावनात्मकत्वादिति भावः। तथा च सामानाधिकरण्यांतस्यैव दृष्टांतत्वेनोक्तत्वान्न तद्विरोध इति भावः। नन्वेवमपि व्याप्तिनिश्चयत्वेनानुमितिहेतुता

अ२

प्र·प्रि·टी·ग
७

वादिनां तद्व्यतिरेकज्ञानाभावस्य तद्धेतुत्वानुपगमात् दृष्टांतासिद्धिर्दुर्वारैवा न च प्रयोजकीभूताभावप्रतियोगित्वं प्रतिबंधकत्वं तद्व्याप्यव्यतिरेकज्ञानस्यास्त्येव तदभा
वस्य व्याप्तिनिश्चयजनकत्वेनानुमितिप्रयोजकत्वादिति वाच्यम्। एवं सति प्रामाण्यव्यतिरेकज्ञानाभावस्यार्थनिश्चयोपपादकस्य प्रवृत्तिप्रयोजकतापा दुर्वारत्वात्। मूलव
क्ष्यमाणहेतुत्वासिद्धेरसंगतेः। न च प्रतिबंधकत्वम् कारणीभूताभावप्रतियोगित्वं प्रयोजकीभूताभावप्रतियोगित्वं ज्ञानज्ञाद्यपक्षे मूले दृष्टांतासिद्धेरनुपलब्धिकास्वरू
पासिद्धेरभिहितात्। द्वितीये तु प्रयोजकत्वं दूषणमभिप्रेत्येति नाग्रिममूलविरोध इति वाच्यम्। एवमपि व्याप्यव्यतिरेकसंशयस्य प्राप्त्यसंशयत्वेन व्याप्तिनिश्चयाविरोधि
तायाश्चान्यथा व्याप्तिनिश्चये एव व्यभिचारस्य दुर्वारत्वात् तदभावस्यानुमितिप्रयोजकतायाश्चापि दुर्वारत्वेन दृष्टांतासिद्धेः। प्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबंधकता
निवेशेऽपि दुर्वारत्वात्। न च प्रयोजकत्वं नियतपूर्ववर्तित्वमेव। एवं च व्याप्यव्यतिरेकसंशयस्य व्याप्तिनिश्चयप्रतिबंधकत्वेऽपि व्याप्तिनिश्चयजन्यकार्ये तदभावस्य नियत
पूर्ववर्तित्वमव्याहतमेवेति न दोष इति वाच्यम्। व्याप्तिसंशयानंतरक्षणोत्पन्नस्मरणाधीनव्याप्तिनिश्चयजन्यानुमितिपूर्वक्षणे तत्संशयाभावस्यासत्त्वेनानुमितौ तस्य
नियतपूर्ववर्तितायाश्चाप्यसिद्धेः। अत्र केचित्। प्रयोजकत्वं कारणतावच्छेदकत्वं। एवं च व्याप्त्यभाववत्त्वप्रकारकसंशयभेदस्यानुमितिकारणतावच्छेदकतया प्रयोजकभेद

श्रीराम·
७

स्य

श्री १ कारण

प्रतियोगित्वरूपं व्याप्तिव्यतिरेकसंशयंप्रतिबंधकत्वमसंमतं । न च विरोधावगाहिव्याप्तिव्यतिरेकज्ञानभेदस्यैव निर्प[illegible]त्वघटकतया कारणतावच्छेदकत्वात्तद्व्यतिरेकज्ञान-
सामान्यस्य प्रतिबंधकत्वमसिद्धमेवेति वाच्यम् । विरोधावगाहिव्यतिरेकज्ञानस्यैव व्याप्तौ निवेशनीयत्वात् । प्रयोजकत्वं वा कारणतावच्छेदकसाधारणम् । अनुमितावपि
व्याप्तिधियो हेतुतायां न संशयान्यत्वनिवेशः विशेष्यविशेषणभावे विनिगमनाविरहात् । अपि तु तद्व्यतिरेकज्ञानाभावत्वेन कारणतानुरूपेयमितिज्ञानानुपपत्तिः । अगृही-
ताप्रामाण्यकज्ञानत्वेन प्रवर्त्तकत्वात्तु स्वरूपासिद्धिर्विषयः । इदमेव बीजमन्यथासिद्ध्यानिराकृतसाहेत्वसिद्धिरूढावपिष्यते । यद्यप्यर्थनिश्चयहेतुतायामप्रामाण्यग्रहा-
भावस्यावच्छेदकताप्रामाण्यनिश्चयस्याहेतुतामते अवश्यमेव स्वीकार्यो । अन्यथाप्रामाण्यसंशयानन्तरं सामग्रीसत्त्वे नार्थसंशयस्यावश्यकत्वे नार्थनिश्चयासंभवे विप्र-
यमिकाद्यर्थनिश्चयापादप्रमात्वेन गृह्यमाणात्वत्रसापत्तेर्दुर्वारत्वात् । न च फलेच्छाफलसाधनताज्ञानाप्रामाण्यज्ञानानामयुगपदनवस्थानात्त्रेपमापत्तिरिति वाच्यम् । इच्छाज्ञा-
नकज्ञानस्यैव यत्र स्वस्मिन्नप्रामाण्यावगाहितात्तत्रैवापत्तिसंभवात् । तथाप्यप्रामाण्यज्ञानाभावस्य जनकतावच्छेदकत्वेप्रामाण्यनिश्चयस्य स्वजन्ये हेतुतायां निर्युक्तिक-
तया अप्रयोजकत्वस्यैव मूलतात्पर्यम् । न चाप्रामाण्यनिश्चयत्वेन प्रवर्त्तकतावादिनामप्रामाण्यग्रहाभावस्य जनकतावच्छेदककोटिनिवेशनमफलम् । प्रतिप्रस-

प्र·चि·टी·ग·
८

गस्यप्रमात्वनिश्चयहेतुतयैववारणादितिशंकैवनावतरतीतिवाच्यम्।यतःशंकितुःप्रमात्वनिश्चयत्वेनहेतुतायांनमानात्पर्यमपितुप्रमात्वनिश्चयस्यसर्वत्रफलो
पधानापेक्षायामेवतथात्वंप्रामाण्यग्रहाभावस्यजनकतावच्छेदकत्वेप्रामाण्यज्ञानस्यज्ञानत्वेनैवहेतुत्वेतित्तदभावस्यतथात्वंसफलमितिवदंतिइदंतुतत्वपायवि
श्चयंविनायत्संशयव्यतिरेकनिश्चयकालेनियमतःफलानुत्पादस्तन्निश्चयोहेतुरित्येवनियमः।यन्निश्चयंविनैवसेतावन्मोत्रोक्तौसंदिग्धस्वरस्यासिद्धिर्व्यतिरेकज्ञाने ति
पादानम्।उक्तासिद्धिवारणाययन्निश्चयंविनेतिनियतफलानुत्पादानुरोधेनानिश्चितप्रामाण्यकतद्व्यतिरेकज्ञानाभावकारणतापेक्षयावश्यगृहीताप्रामाण्यक
तन्निश्चयत्वेनलाघवात्कारणत्वमुचितम्॥अन्यथागौरवादित्यस्यव्याप्तिग्राहकतर्कः।अत्रचप्रामाण्यनिश्चयस्यहेतुत्वेपिवह्नौतद्व्यतिरेकज्ञानाभावस्यनकार
णतोपपद्यते।अथनिश्चयरूपकारणाभावादेवाप्रामाण्यज्ञानदशायांप्रवृत्तिवारणसंभवादितिव्याप्तेरप्रयोजकत्वमितितत्संदेहेसतीत्यादिनोद्भावनीयम्।तत्रतयो
रप्रतिवंधकताविरहस्यैवतयोःकारणीभूताभावप्रतियोगित्वरूपप्रतिवंधकत्वानुपपत्त्यादित्येवार्थः।तथाचोक्तव्याप्तिग्राहकतर्कस्यावकाशइतिनकश्चिद्विरोधः।अ त्र
[illegible]यद्यपिप्रामाण्यनिश्चयस्य[illegible]हेतुत्वेप्राथमिकार्थनिश्चयादप्रामाण्यज्ञानास्कंदितात्प्रवृत्तिवारणायाप्रामाण्यज्ञानाभावस्यकारणत्वंकारणतावच्छेद

चर

श्रीराम·
८

सर्व २

एकत्वं वा स्वावश्यकमित्युक्तप्रयुक्तो। प्रामाण्यनिश्चयो हेतुरेवेति समाधानं संभवति। तथाप्यप्रामाण्यज्ञानाभावहेतुतापक्षे कारणतावच्छेदकगौरवेपि धर्मिरात्तत्र निप
तपूर्ववर्तितायाश्चक्लृप्तत्वात् प्रामाण्यनिश्चयहेतुतामते च तत्कल्पनाधिक्यादभावहेतुतापक्षोपि साधुः संभवतीत्यालोच्य प्रामाण्यनिश्चयस्य हेतुत्वमभ्युपेत्याप्यप्रामाण्य
शंकानिवर्त्तकतया प्रामाण्यनिश्चयोपयोगिता नैयायिकादिसिद्धांतसिद्धमुपदर्शयिशेषंगमपिष्यत्तेनेत्यादिना। स्वत एवेति मूलं स्वेनैवेत्यर्थः॥ निरूपणामवगाहनं स्वपदं
च प्राभाकरकथायां प्रामाण्याश्रयज्ञानरूपस्वपदमेव मिश्रकथायां स्वकीयानुव्यवसायपरम्। भट्टकथायां ज्ञाततयाद्वारा स्वप्रयोज्यज्ञाततालिंगकानुमितिपरम्। अथवा
स्वत एव प्रामाण्यनिरूपणं प्रामाण्यज्ञानं स्वप्रयोज्यमेव। स्वं च मिश्रभट्टयोर्मते व्यवसाय एव गुरुमते स्वकीयासामग्रीज्ञानप्रामाण्यमित्यत्र प्रामाण्यपदस्य नानार्थत्वेपि
तद्वृत्तितत्प्रकारकज्ञानत्वरूपतदर्थस्यैव पक्षतया ज्ञानीयत्वस्य तत्राव्यावर्त्तकत्वेन ज्ञानपदवैयर्थ्यमिति पूर्वपक्षे प्रामाण्यपदस्य भावकरणव्युत्पत्तिभ्यां प्रमायां प्रमाकर
णे च प्रयोगस्याविशेषात्। ज्ञानपदादाने प्रामाण्यपदस्य प्रमाकरणतापरत्वभ्रमः स्यात्तद्वारणीयं ज्ञानपदं ज्ञानपदोपादाने ज्ञानस्यैव यत्प्रामाण्यमिति समासेनान्वपि
तावच्छेदकावच्छेदेन ज्ञानत्वेनैवं विवक्षया प्रमाकरणत्वत्वावच्छिन्ने च समभिव्याहृततत्त्वे प्रसानन्वयात् भ्रमनिरासइति। विशेषतासप्यर्थाहकृततया ज्ञानपदं सार्थ

त्य

कम्। अथवा प्रमाकरणत्वसाधारणप्रमाणपदार्थत्वेनतद्धृतितत्प्रकारकत्वपरं प्रमाणपदं न तु विशेषरूपेण तथा च ज्ञानपदानुपादाने प्रमाकरणत्वे बाधइति
तदुपादानं तद्दलाघवेन रूपेण प्रमाणपदार्थमात्ररूपेण ज्ञानत्वेनैव सविवक्षया बाधनिरास इति तत्सार्थकतेति केषांचित्समाधानं निराकर्तुमुपन्यस्यति। कर
णेति। करणांशभ्रमः प्रमाणपदगतस्य प्रमाकरणांशे संनिरासार्थमित्यनंतरं सामान्यरूपेण पक्षत्वेंऽशतो बाधनिरासार्थं वेति दूषणीयम्। तेनात्र सामान्यपरत्वे
इत्यादिवक्ष्यमाणदूषणसंगतिः। ननु ज्ञानपदस्य करणास्तु उंतस्य ज्ञानकरणार्थकतयात्मनस्तत्रत्वभ्रमदशायां तस्य अभिव्याहारेणापि प्रमाणपदस्य न कारणपरत्व
भ्रमनिरास इत्यत आह। ज्ञानपदस्येति। भावव्युत्पन्नस्येति भावे ल्युडिप्रयोगादित्यर्थः। अतस्तत्र न कारणपरत्वभ्रम इति भावः। प्रथमपक्षं दूषयति। प्रमाणपदस्येति। ए
तदनंतरं प्रवृत्तिकज्ञानविषयप्रमाणपदार्थमविकल्पेवाक्षेपेण तस्यैव पक्षत्वनतयेति दूषणीयम्। विशेषपरत्वे। विशेषपरत्वनिश्चये सतीति। भ्रमासंभवात्। अन्यपरत्वभ्र
मासंभवात्। द्वितीयं दूषयति। सामान्यपरत्व इति। अंशतो बाधात् प्रमाणपदार्थे विशेष्यावृत्त्यस्य प्रकारकज्ञानता दोषाभावसंभवात्। क्वचिद्विशेष्यावृत्त्यप्रकारकत्वाद्धि सामान्य
परत्व इति पाठः। तत्र विशेष्यावृत्तित्वमभिधानमंशतो बाधस्फुटीकरणाय। एतत्र विशेष्यावृत्त्यप्रकारकत्वविशिष्टेपि प्रमापदस्य शक्तिरित्यभिमानेन। वस्तुतस्तु अंशतया श

ष्पा२

तुच्छत्वातु

कं

माण्यपदेन प्रामाण्यपदार्थत्वेनानुपस्थानात्स्वरूपेणैव प्रमापदप्रवृत्तिनिमित्तत्वेन प्रमाकरणत्वमाह तेनैव प्रमात्वमुचितं। तथा सत्यपि ज्ञानपदव्यावृत्तेरे
वृत्त्यमाणत्वादिति निरूपणात् दूषणम्। अत्र व्याख्यान्तरमुपेक्षितम्। स्वयं व्यावृत्तिं दातुमुपक्रमते। वस्तुत इति। इच्छावृत्तितद्भिन्नत्वप्रकारकत्वव्यावर्तकतया ज्ञानपदं सा
क२ र्थमपि अस्मिन् प्रामाण्यपदस्य प्रमाणाभावपरत्वे इच्छायाः प्रमाणपदार्थत्वविरहेणातत्साधारणधर्मस्य प्रामाण्यपदेनालाभात्। ज्ञानपदानर्थक्यमिति शंकायां प्रथमं तन्निरा
करोति। प्रामाण्यपदमिति। प्रमाणमात्रवृत्तिधर्म्ममात्रपरं। भावप्रत्ययबलात्। प्रमामात्रवृत्तिसकलप्रमावृत्तिधर्म्मपर्यवसितार्थः। अंशतो बाधादिति। प्रमान्यसमप्रकारकज्ञा
नत्वादेरपि तथात्वादिति भावः। ननु प्रकृत्यर्थतावच्छेदकधर्म्म एव भावः न तु तत्समनियतधर्मान्तरम्। तथा च तद्भिन्नत्वप्रकारकानुभवस्यैव प्रमापदवाच्यतया लाभादनु
भवत्वमेव प्रामाण्यं न तु प्रमान्यज्ञानत्वादिकमित्यत आह। अनुभवत्वेति। विवादाभावादिति। अनुभवत्वस्य तन्मते स्मरणान्यज्ञानत्वरूपतया तेषामपि परतोग्राह्यत्वादि
व ति भावः। तथा च तत्संसर्गस्यापि नोपादानसंभव इति भावः। मात्रपदमिति। मात्रपदेनानुभवत्वव्यवच्छेदः। स्मरणसाधारणैकदेशोल्लक्षणोपगन्तव्य इति भावः। इदमत्र चिंत्य
धातो म्। ज्ञानत्वविशिष्टवाचकतया प्रकर्षद्योतकप्रकृष्टोपसर्गसमभिव्याहृत्या यथार्थरूपप्रकर्षविशिष्टज्ञानत्वमेव शक्तिलभ्यं स्यादिति करणे तार्किकाणां प्रमाणव्यवहा

रा अर २

द्विरहात्त्वनुभवत्वघटितधर्मावच्छिन्ने परिभाषैव एवं चात्र शाब्दार्थमुपेक्ष्य ज्ञानपदोपादानमयुक्तमितित्तु तन्मात्रे चा।इच्छावृत्ति।इच्छावृत्तस्य वि।एतद्दन्तं तत्सम
त इतिशेषः।नयथोक्तसाध्यवदिति।नयाबस्ताश्रयग्राहकग्राह्यत्वरूपसाध्यवदित्यर्थः।इच्छायाम्‌विस्ताश्रयत्वादिच्छाग्राहकेन च तदग्रहादिति भावः।ज्ञानपदे
दत्तेपि कृतो [illegible]न वाधज्ञानेच्छयोः प्रामाराप्यस्यैकेन पक्षासंकोचादित्यत आह।तेनेति।ज्ञाननिष्ठस्येति।ज्ञानवृत्तित्वविशिष्टस्येत्यर्थः।लाभात्साध्यघटकाश्रयवि
शेषणात्तया लाभात्।त्वपदस्य समभिव्याहृततादृशाविशिष्टार्थकत्वादिति भावः।ननु साध्यहेतुज्ञानपदस्य साश्रयार्थकत्व एवोक्तरीत्या ज्ञानेच्छाप्रामाराप्या
भेदे वाधप्रसक्तिर्न तु यथाश्रुतार्थपरत्वे इच्छावृत्तित्वे विप्रामाराप्यस्य ज्ञानग्राहकेन [illegible]ग्रहनियमात्।जदेवत्तेकृतइत्साशायेन शंक्यते।न चेति।ज्ञानेच्छासाधारणाप
पीति यथाज्ञानस्य तदाश्रयत्वं तथा इच्छायास्तदाश्रयत्वेपीत्यर्थः।केचित्तु [illegible]चेच्छावृत्तीसादित्यंथो यथाश्रुत एव ज्ञानेच्छयोः प्रामाराप्यभेदपरतया संगमनीयः।प्रा
माराप्यस्यैक्याभिप्रायेणोदं वाधोद्धारशंका न च प्रामाराप्याभेदे इच्छावृत्ति[illegible]प्रामाराप्यज्ञानग्राहकग्राह्यत्वरूपसाध्यसापि वाधेन न यथोक्तसाध्यवदिति ग्रंथस्य ता
दृशसाध्यपरत्वात्।एवं मिच्छाग्राहकग्राह्यत्वेन वाधस्याप्रदर्शितत्वादाशंकामध्ये इच्छावृत्तित्वेनाग्रहेपीसंतेन इच्छाग्राहकग्राह्यत्वाभ्युपगमस्यासंगतिप्र

स्थ

५३

ह फ १

श्री ५२

ऽंग इति वाच्यम् । व्याप्यवज्ज्ञानत्वौत्पत्त्याख्यत्वं साध्यमत्तीस्वज्ञानप्रदस्वस्वाश्रयप्रतम्याज्ञानग्राहकयावद्भूत्यत्वसत्वेऽपि न साध्यसत्वमिति वांतरर्थांकांतरो ह्यसायत्ततत्वंदे
यथाश्रुतज्ञानपदार्थप्रसिद्धियोगे प्रयोजनविरहेणोक्तिपूर्वणीत्तपानत्वं संगतेरिता द्रुः । ज्ञानभागे ज्ञानव्यहेप्रसीहततस्वप्रामाण्यस्वग्रहनियमात्प्रमाननियमात्तु य
थाश्रुते बाधादिति । कथंचिदपि प्रामाण्ये घटत्ववति घटत्वप्रकारकत्वादिरूपे सकलघटपदादिज्ञानग्राहकग्राह्यत्वसामान्यादिति भावः । अग्रिमेति । तृतीयेत्यर्थः
४ । विशेषणस्य प्रामाण्यग्राहकत्वस्येत्यादेः प्रक्षेपेऽपि ग्राह्यांशेऽसंभवादित्यन्वयः । अत एवेति विशेषणप्रक्षेपेणाबाधवारणायेत्र पक्षासंकोचोऽप्रामाण्य
ग्राहकसामग्र्या ग्राह्यत्वज्ञानप्रामाण्यमात्रस्य पक्षत्वेऽज्ञातो विभेदसंभवादित्यर्थः । तथा चेति । साध्यस्य ज्ञानप्रदस्वस्वाश्रयपरत्वे चेत्यर्थः । ज्ञाने विशेषणोपसीभूतप्रा
माण्ये ज्ञानहनित्वस्य विशेषणत्वे बाध एवेति तद्धितेति तद्धितत्प्रकारकत्वाश्रयेच्छाग्राहकेण प्रामाण्यग्रहादित्याशयः । तदंशे बाधनिवृत्तिकं ज्ञानग्राहकेणेवे
च्छालौकिकप्रत्यक्षसामग्र्या अपि प्रामाण्यग्रहे बाधकाभावः । नवेच्छाया अनुपनायकत्वाद्विषयोपनयासंभवेन तत्प्रत्यक्षेन प्रामाण्यभानसंभवः । इच्छाजनकज्ञा
नस्य तज्जन्यजे सामान्यलक्षणाप्रत्यासत्तिविरहेणासिद्धतद्विषयकत्वात्तद्विषयकत्वे पिविनष्टपदवस्थज्ञानजन्येच्छाप्रत्यक्षे विषयोपनयसत्तोऽसंभवादिति वा

यादिषा१

तत्प्रक्षेपेणाबाधप्रसक्ते
रथे पक्षसंकोचः ४

प्र·प्रि·टी·ग·
११

नर स ति

अभाविषयानुपरक्तं विषयकपदार्थप्रत्यक्षानुपगमेनेच्छा इत्यत्र विषयभाननियमात् विषयभासकसामग्र्यसत्त्वेन तत्र तत्संसर्गस्यैवानुदयादित्यत आह यद्वेति । विषयोप
नयसंभवे प्रमारोपभाने बाधकविरहेपीति तेषां ज्ञानग्रह एव स्वतः प्रमारोपभानमिति सिद्धांतः तदा प्रकाशितासाधं शे लौकिकप्रमारोपभाने ज्ञानांशे लौकिकत्वनिय
मेन ज्ञानलौकिकप्रत्यक्षसामग्र्याः प्रयोजकत्वमभ्युपेत्यापि विनैवातिरिक्तकार्यकारणभावकल्पनं तन्निर्वाहसंभवे नेच्छाग्राहकसामग्र्याः प्रमारोपग्राहकत्वे विवाद
स्तत्वेनाप्ययदीसुकं तद्धर्मग्रहतदीयप्रमारोपग्रहतदा विज्ञानांतर्भावोस्त्विति योजना पक्ष इति शेषः । कथमित्याकांक्षायामाह । तथापीति । इच्छाग्राहकेण प्रमारोपग्रहोऽपी पगमे
त्यर्थः । अगृहीते प्रमारोपग्राहकसामग्र्यादिनियमेनागृहीतं प्रमारोपपक्षैवं भूतं पक्षज्ञानं पाचनाद्दशीतत्समानविषयेच्छातत्प्रमारोपइत्यर्थः । समानविषयेति स्वप्रमारोप
ग्राहकसामग्र्यादिनियमेनागृहीतं प्रमारोपपक्षैवं भूतं पक्षज्ञानं पाचनाद्दशीतत्समानविषयेच्छातत्प्रमारोपइत्यर्थः । समानविषयेति स्वरूपकीर्तनं बाधइति । साध्यज्ञाना
दिग्राहकेणतद्ग्रहादिति भावइति असतः ज्ञानपदे दत्ते यथा हश ज्ञानजनकसामग्रीयत्वं साध्यं तादृशज्ञानविषयज्ञानात्मकत्वात् बाधइत्याशयः । तदाज्ञानांतर्भावोस्त्विति घ्न२
पाटे सादिशंका तथापीत्यादिग्रन्थे स्वबाध इतीत्यनेन तदंज्ञानपदेऽपाशानमिति शेषः । केचित्तु । तदाज्ञानांतर्भावोऽप्यस्तु साध्ये विज्ञानांतर्भावः । यत्र स्वज्ञानपदसार्थक्यायास्तु
नदंतार्थदिति

ग्रा२ र्थ२

तथाप२ ये४

स्वाश्रयज्ञानग्राहकयावत्त्वं साध्यमस्त्विति यावत्तात तथापि तद्ग्रहणोपायाभावे अगृहीतप्रामाण्यकज्ञानं तदीयेतरसमानविषयकेच्छादुर्ज्ञेयतया ग्रह्यमाणो बाध इति ज्ञानदुर्ज्ञेयतया ग्र

ह्यमाणत्वाभावज्ञानयद्मिति व्याचक्रुः॥ पक्षे ज्ञानपदोपादानेपि साध्ये ज्ञानदुर्ज्ञेयत्वविशिष्टतद्वृत्तित्वप्रकारकत्वाश्रयत्वपर्यन्तानिवेशे बाधवारणासंभवान्न तत्तन्निवेशो

व्या॰ पक्षे ज्ञानविशेषणमव्यावर्तकमिति तस्येच्छाप्रामाण्ये विवर्तकत्वमुपपादयितुं ज्ञानेच्छयोः प्रामाण्यभेदमवस्थापयति। वस्तुतस्त्विति। ज्ञानेच्छयोरिति। यथा नैयायिकमते इ

च्छायां न स्वाभाविकं स्वविषयकत्वं किंतु यावितमरणन्यायेन जनकज्ञानविषयतैव तथात्वमिति प्रामाण्यमेव तत्प्रामाण्यमिति ज्ञानपदस्य प्रामाण्यानव्यावर्तकत्वं संभ ज्ञान४

विषयासिद्ध वतु तथा न तन्मते तन्मते हि इच्छाजनकज्ञानस्येच्छाविषयकत्वविरहेण तदीयविषयताया इच्छामात्रविषयत्वानुपपत्तेरिति। इच्छायामपि स्वाभाविकी विषयतास्वीकारेऽपि सा क४

चेच्छास्वरूपतया ज्ञानस्वरूपज्ञानविषयितातो भिन्नैवेति तदवच्छिन्नं तत्प्रामाण्यमपि भिन्नमेवेति स्वाश्रयज्ञानाश्रमि इत्यत्र न बाधितं साध्यमंशतो बाधितं तत्राशंका गृह्यमित्यर्थः

।अत्र चेच्छाग्राहकेण प्रामाण्यग्रहे पक्षे ज्ञानविशेषणसार्थक्याय साध्ये ज्ञानांतर्भावः। प्रक्षालनाद्धीति न्यायेनाप्रकृते सत्त्वरसः कल्पांतरानुसरणे बीजं ज्ञानपदोपादाने

ऽपि ज्ञानेच्छयोरिव ज्ञानव्यक्तीनामपि भेदेनोक्तरीत्या प्रामाण्यभेद इति एकज्ञानप्रामाण्ये अन्यदीयप्रामाण्याश्रयग्राहकग्राह्यत्वाबाध इति प्रामाण्यपदार्थस्तु व्यक्तित्वेन सा

६२ नै

प्र·मि·टी·ग·

१२

पि६३ धत्

ध्येपक्षेचनिवेशनीयइतिज्ञानविशेषणावैयर्थ्यंदुर्वारमेवेतिवाच्यम्।स्वाश्रयग्राहकयावत्सामग्र्यग्राह्यत्वंय॰ स्वज्ञानहन्निरुविशिष्टतावच्छेदकत्वस्यस्वाश्रयज्ञानग्राहकया

तं त्वंयथतावृत्त्वतमत्वस्यस्वग्राहकयावद्ग्राह्यत्वंविशिष्टाश्रयतासंबंधेनज्ञानेस्वैववास्वोध्यत्वयोक्तबाधवारणात्।विषयभेदेनप्रामाण्यभेदाज्ज्ञानेच्छयोर्नैकंप्रामाण्यमितिप

थाप्युक्तार्थोनसाधुःइच्छाजनकज्ञानस्यासिद्धेरिच्छासमानविषयकत्वविरहेपिविषयसिद्ध्युत्तरकालीनतद्विषयकज्ञानसमानविषयकत्वस्येच्छायामक्षततात्।तानचयद्विष

त्तान् यकेच्छाविषयसिद्ध्युत्तरमपितत्समानविषयकज्ञानंनजातंतत्प्रामाण्यपदप्रामाण्यसिद्धिर्दुर्वारैवेतिवाच्यम्।तत्प्रामाण्यस्याज्ञानेबाधग्रहासंभवात्।अज्ञातप्रमानज्ञानप्रा

तत्प्रामाण्यस्येत्यनुपज्ये माण्यतुल्यत्वाच्चाज्ञातानैतज्ज्ञानस्येच्छतदाश्रयत्वात्तत्सुखविशेष्यतायाःप्रामाण्यग्रहकत्वात्।केचित्तुज्ञानादिसमुक्तिभेदेनैवप्रामाण्यभेदःविषयतायाःस्वरूपातिरिक्तत्वात्त २४

थापिज्ञानेच्छयोर्नैकंप्रामाण्यंज्ञानविषयतानहेच्छात्मताजेच्छाविषयतायाविलक्षणत्वात्।नचेच्छामुखविशेष्यत्वैवोद्देश्यतेतिवाच्यम्।अहंसुखीस्यामित्यत्रसुखत्वादेरुद्दे

देश्यतापत्तेरितिज्ञानपदासत्त्वप्रदानेनहृतितत्प्रकारकत्वाश्रयज्ञानग्राहकेनयावत्त्वमिच्छाहतिप्रामाण्यग्राहितमितिवरणीयंतितदपिनाइच्छाहत्त्वस्योद्देश्यतायाविशेष्यतात्व

विरहेणाप्रामाण्यग्रहकत्वयाविशेष्यतायाःस्वज्ञानसाधारण्यातयाज्ञानेच्छाहतिप्रामाण्यैक्यसंभवात्।अन्येतुइच्छाग्राहकसामग्र्याःप्रामाण्यग्राहकत्वमेवनिराकरोतिाव

स्याप्रसिद्धेः इच्छारतिप्रामाण्यवत्तयावत्प्रतानात्यावत्तदाश्रयज्ञानग्राहकग्राह्यत्वंयावद्देतर्गतेनतद्विनसंस्कारकत्वाश्रयज्ञाने २

त्

श्रीराम·

१२

नं२

स्तु मतिविसादिना। ज्ञानेच्छयोरिति। ज्ञाने इच्छायां च प्रामाण्यग्राहकसामग्र्यां न तु स्वत्वमित्यर्थः। तयोः इच्छापूर्वकालीनज्ञानेन तदीच्छयोः विषयभेदादिति। तथा चेच्छायास्तु पना
यकत्वात्तत्सिद्धविषयकस्य ज्ञानस्य चेच्छायामसिद्धविषयोपनायकत्वासंभवात् प्रामाण्यग्राहकसामग्रीति भावः। इच्छाप्रत्यक्षे तु विषयाविषयकमेव। तटस्थज्ञानांतरविषयवि
षयासंसर्गाग्रहाद्विषयविशिष्टव्यवहार इत्याशयः। तदाश्रयज्ञानाप्रसिद्धेः। तदाश्रयेच्छाभावः प्रामाण्यप्रकारेण ज्ञानासंभवात् ज्ञानग्राहकेति। ज्ञानजनकेत्यर्थः। इच्छाप्रत्यक्षे विषया प्र३
भावेन तद्ग्राहकसामग्रीसाध्यत्वस्यैव न विषयविशिष्टत्वाश्रयग्राहकसामग्र्या एव विवृक्षणीयत्वादित्येतत्केत्यैः निर्भरबीजम्। अनुभवत्वगर्भे प्रामाण्ये प्रामाण्यपदस्य तद्वति तत् ग्रासे॰
१२ प्रकारकत्वानुभवत्वरूपार्थवृत्तत्वमेव स्मृतिव्यावृत्तप्रमालाभे पक्षस्य स्वतस्त्वविवादविषयत्वस्मृतिव्यावृत्तलाभे स्मृतावितितन्मते मीमांसकमते स्मृतिसाधारणप्रामाण्यं केवलयाथार्थ्य
रूपं स्मृतिपरत एव याथार्थ्यमिति भ्रमस्यात्त्वमा भूदित्यर्थः। तेन स्मृतिसाधारणज्ञानपदोपादानमहिम्ना ज्ञानसामान्यप्रामाण्यपक्षोऽलभ्यत इति स्मृतिसाधारणयाथार्थ्यमात्रस्य पक्ष
त्वं लभ्यत इत्यर्थः। तथा च यथार्थस्मृतिग्राहकसकलसामग्र्या अपि स्वाश्रयग्राहकसामग्र्यंतर्गतत्वालाभात् भोक्तव्यम इति भावः। अत्र च तन्मते अनुभवत्वस्य स्मृत्यन्यज्ञानत्वरूपस्य
स्वतोग्रहासंभवात् ग्राहकसामग्र्या अनुभवेऽग्रहत्वमारोप्रामाण्यभानं नहि ग्राहकसामग्र्याः स्मृतिस्थलेऽपि विशेषोऽस्ति नोक्तभ्रमसंभव इत्यस्वरसः। समर्थप्रवृत्तिजनकतावच्छेदकपरं स
र्थ

त्वे४

प्र·मि·टी·ग·
१२

५८

५ बाधो मीमांसकमते साध्याप्रसिद्धिर्न्यायमते

५२

ग्रादिप्रवृत्तिप्रयोजकत्वाभिप्रायं।प्रयोजकत्वंकारणीभूतप्रमासाधारणं।सर्वसाधारणोति।प्रमाकरणादिसाधारणोर्थः।प्रमाकरणत्वस्यापिप्रमाद्वारासंवादिप्रवृत्तिप्रयोजकसा
धारण्यादितिभावः।एवंसतिचक्षुरादिनिष्ठप्रमाकरणत्वेंऽशतोबाधवारकतयाज्ञानपदंसार्थकम् यत्तुविशेष्यावृत्त्यप्रकारकत्वादौज्ञानपदेदत्तेपूर्वोक्तपक्षतावच्छेदकाक्रां
तेंऽशतोबाधस्तु[illegible]तयाप्रसक्तंतत्प्रथमंतदुद्धरतियावदित्यादिनात्वज्जातीयमिति।यावज्ज्ञानग्राहकग्राह्यत्वज्जातीयमित्यर्थः।तज्जातीयत्वंचतद्वृत्तितादृशग्राहकग्राह्यताकत्वमत
द्वयमितिद्वेतादृशग्राहकग्राह्यताकत्वंप्रमाधर्मितान्यतरद्रूपवत्त्वंविशेष्यावृत्त्यप्रकारकत्वादिर्वेयावज्ज्ञानग्राहकग्राह्यस्तद्विशेष्यकतत्प्रकारकत्ववृत्तित्वेऽयमतःसिद्धस्ततोग्रा
ह्यताकज्ञानत्वादिभिन्नत्वसहितप्रमाधर्मत्वंसत्वात्तज्जातीयत्वरूपसाध्यनिर्वाहान्नांशतोबाधः।अन्यतरघटकप्रथमदलनिवेशाज्ज्ञानत्वादौनांशतोबाधोनवासाध्याप्रसिद्धिः।स्व
तोग्राह्यज्ञानत्वादिवृत्तिप्रमाधर्मत्वमादायसिद्धसाधनवारणायतत्रघटकद्वितीयदलेऽप्रामाण्यांतनिवेशः।तदर्थश्चग्राहकसमतद्व्यसिद्धस्वतोग्राह्यतात्तादृशपर्याप्तधर्म्मपर्याप्ताश्र
यत्वंतेनोभयसिद्धस्वतोग्राह्यप्रामाण्यैकदेशज्ञानत्वादिप्रकारकत्वादिविशिष्टप्रमाणापर्याप्तत्वेऽपिनक्षतिः।प्रमाकरणत्वेबाधवारणायप्रमाधर्मत्वनिवेशः।प्रमासत्त्वस्थलेज्ञानत्वमा
त्रनिवेशेज्ञानवृत्तिधर्ममात्रस्यैवान्यतररूपसत्त्वेनबाधानवकाशात्।पक्षतावच्छेदकघटकज्ञानवृत्तित्वमिज्ञांशवैयर्थ्यमितिप्रमात्वनिवेशनमात्रंनिवेशेनिप्रकारकत्वादौबाध

२नम्म प्रामाण्यांशइत्यर्थः

श्रीराम·
१२

वारकतया निरुक्तशामान्यपदार्थनिवेशसार्थक्यम्। एवं सति विशेष्यावृत्त्यप्रकारकत्वादिमात्रस्य स्वतोग्राह्यतामाहापार्थान्तरनिरासस्तादृशधर्मस्य स्वतोग्राह्यतासंभवेन बाधा
देस्तदेवावस्तुतस्त्वित्यादिकल्पानुसरणे बीजम्। यत्तु सजातीयत्वं यत्किंचित्तादृशधर्मव्यापकत्वं। तन्न। विशेष्यावृत्त्यप्रकारकान्यत्वस्य प्रमाभ्रमोभयवृत्तिसमूहालंबनेऽसत्वे
प्रमात्वाव्यापकतया बाधानुद्धारात्। न च संवादिप्रवृत्तिप्रयोजकतावच्छेदकत्वं तद्वद्विशेष्यकतत्प्रकारकप्रवृत्तिनियताव्यवहितपूर्ववृत्तितावच्छेदकत्वमवच्छेदकताघटकसं
बंधश्च स्वाश्रयत्व स्वाश्रयजन्यत्वान्यतरसंबंधः। स्वाश्रयजन्यत्वसंबंधेन प्रमाकरणत्वत्वावच्छिन्नस्यापि नियमतः संवादिप्रवृत्त्यव्यवहितपूर्ववृत्तितावत्तद्विप्रवृत्तिप्रयोजकता संवादि
४ वच्छेदकमिति तत्र बाधवारणाय ज्ञानपदम्। प्रमात्वाव्यापकदर्शितधर्मस्य न संवादिप्रवृत्तिनियतपूर्ववृत्तितावच्छेदक इति न तत्र बाधावसर इति वाच्यम्। संबंधमध्येऽन्यतरत्वेन
स्वाश्रयजन्यत्वमंतर्भाव्य प्रमाकरणत्वसंग्रहे तेन पदसार्थक्योपपादने प्रमात्वप्रमाकरणत्वान्यतरत्वेन प्रमाकरणत्वं पक्षेऽन्तर्भाव्यैव तत्पदसार्थकतौ चिंतातान्। तथा सति साध्य
जातीयत्वानंतर्भावेपि बाधानवकाशात्। प्रमात्मकज्ञानीयजनतादिप्रकारकत्वव्यक्तीनां स्वतोग्राह्यतयानव्यापकतामादाय प्रमात्वे साध्यत्वेन सिद्धसाधनतापातात् चानुचयेन
रूपेण स्वतोग्राह्यत्वोपनीतमादाय यत्किंचिद्धर्मावच्छिन्नव्यापकत्वमेव स्वतोग्राह्यजातीयत्वं रजतत्वप्रकारकत्वादिनेव रजतत्वप्रकारकत्वादेः स्वतोग्राह्यतान्द्रूपावच्छिन्नवध

वृ.मि.टी.ग.
२५

मसाधारणमिति ननु तद्वच्छिन्नव्यापकता। प्रमात्वस्य गुरुमते शुक्तिज्ञानसहितस्य तत्र रजतत्वतावच्छिन्नरजतत्वविषयकज्ञानस्य भ्रमेपि ज्ञानांतरविषयप्रत्वांशे रजतत्व
स्य विशेषणतापन्नतापि रजतत्वप्रकारकत्वतावच्छिन्नसत्वेन ननु तद्वच्छिन्नव्यापकता प्रमात्वस्येति न तन्मते प्रमात्वस्य स्वतोग्राह्यतासिद्धिरिति वाच्यम्। एवमपि रजतत्वं उप
लक्षितधर्मिविशेष्यतानिरूपितरजतत्वप्रकारताकत्वत्वरूपस्वतोग्राह्यतावच्छेदकरूपावच्छिन्नं श[illegible]रजतादिविशेष्यकत्वावच्छिन्नरजतत्वादिप्रकारकत्वत्वविशिष्टस्य व्याप स्वा
कतया सिद्धसाधनस्य दुर्वारत्वात्। यदि च निर्द्धर्मितावच्छेदकत्वानस्याश्रवत्वकतयाश्रवच्छिन्नरजतादिनिष्ठविशेष्यतानिरूपितरजतत्वादिनिष्ठप्रकारताकत्वमपि निरुक्तपक्ष
तं५ तावच्छेदकाक्रांतस्य च न निर्द्धर्मितावच्छेदकरजतत्वादिप्रमासाधारणोपदर्शितधर्मव्यापकत्वमित्युच्यते तदापि रजतत्वाद्युपलक्षितनिष्ठावच्छिन्नविशेष्यतानिरूपितरज
तत्वादिप्रकारताकत्वरूपव्यापकत्वस्य सिद्धस्वतोग्राह्यत्वधर्मव्यापकतायाः दर्शितप्रमात्वे सत्वेन सिद्धसाधनस्य दुर्वारत्वात्। एवं प्रमात्वस्य ज्ञानव्यक्तिभेदेन किमपि प्रमासाधारणं संवादिप्र
वृत्तिनिपतत्पूर्ववर्तितावच्छेदकं यत्किंचित्संवादिप्रवृत्तिनिवेशेपि न कस्यापि प्रमामात्रस्य स्वतोग्राह्यतावच्छेदकरूपावच्छिन्नव्यापकत्वमिति वाच्यो दुर्वार एवेत्यलमसदावे
शेन। वस्तुतस्त्विति। प्रमापदप्रवृत्तिनिमित्तं प्रमापदप्रवृत्तिनिमित्ततावच्छिन्नम्। अत एव तद्वृत्तितत्प्रकारकत्वत्वसपक्षतानवच्छेदकतादेवाडनिकेति। विवक्षितनामरू

श्रीराम.
१५

विशेषवृत्ति

पेक्ष्यैः । प्रवृत्तिनिमित्तं इ [illegible]ति शरीरवृत्तिजातिविशेष इति शेषः । ज्ञानपदमिति । ज्ञानपदे दत्ते शरीरवृत्तिजातेर्ज्ञानवृत्तित्वाभावाद्व्युदासः । न च परतोग्राह्यत्वप्रयुक्तधर्मविशिष्टज्ञाने प्रमापदं केनचित्संकेतितं तादृशधर्मे बाध एवमपि दुरुद्धर एवेति वाच्यम् । द्वादशेऽहनि पिता नाम कुर्यादिति श्रुतिसत्त्वेन पितृकृतं नामैव वाचकं न त्वाधुनिककल्पितं तेन प्रमितिज्ञानवृत्तिपरतोग्राह्यत्वधर्मान्तरस्य प्रमापदप्रवृत्तिनिमित्तताभावात् । शक्यतावच्छेदकस्यैव प्रवृत्तिनिमित्तत्वात् । अथ नामकरणविधायकश्रुतिर्न चैत्रादिपदस्य नियामिका नैतं पितृकृतनाम्नो वाचकत्वमन्यनाम्नोऽवाचकत्वमिति चेदुच्यते । द्वादशेऽहनि पिता नाम कुर्यादिति श्रुतेः पदविशेषस्य किंन विधायकं वा कां पदविशेषबोद्धव्यत्वविशिष्टपुत्रविषयकसंकेतस्येष्टसाधनताबोधकं तत्र च तादृशवाक्यार्थविषयकं वेदवक्तुर्भगवतो ज्ञानमिव तादृशवाक्यार्थबोधपिषापि हेतुः । अन्यथा नात्स्यप्यनिर्वाहात् । वाक्यार्थबोधविषा च वाक्यार्थपरके तद्विषयकबोधमवगाहमानं वाक्यार्थमप्यवगाहते इति भगवदिच्छायाः पदविशेषबोद्धव्यत्वविशिष्टपुत्रविषयकत्वेन संकेतविषयकत्वसिद्धौ पदविशेषबोद्धव्यत्वविशिष्टपुत्रविषयकत्वमपि सिद्धं तथा च चैत्रादिपदबोद्धव्यत्वप्रकारतानिरूपितभगवदिच्छाविशेष्यतायाश्चैत्रादेः सत्त्वेन पितृसंकेतितस्यापि चैत्रादिपदस्य पुत्ररूपविशेषवाचकत्वं दुरपवादमेव । न चैवमपि चैत्रत्वादिजातेः प्रवृत्तिनिमित्तत्वं न सिध्यति । यद्विशिष्टे यत्पदबोद्धव्यत्वं परमेश्वरसंकेतेनावगाह्यते तादृशविशेषणस्यैव तत्पदप्रवृत्तिनिमित्त

कृ २

न्यै

त्वात्।उपदर्शितेच्छायां चपुत्रत्वादिविशिष्टस्यैवबोद्धव्यत्वतयाभानेननतुजातिविशेषणानामितिवाच्यम्।पुत्रासाधारणधर्मपुरस्कारेणैवपुत्रविषयकसंकेतस्यविधेयतया
तादृशधर्मविशिष्टविषयकत्वस्यसंकेतेनविशेषणतयातादृशवाक्यार्थबोधकतयातादृशवाक्यार्थविषयित्वांशेभगवदिच्छायांपुत्रासाधारणधर्मत्वोपलक्षितजातिविशेषा
णांबोद्धव्यत्वविशेष्यतयाभासमानधर्मिणिविशेषणतयाऽवगाहनध्रौव्यात्।एवमानुपूर्वीविशेषाणांवाचकतावच्छेदकत्वमपिनिर्व्यूढमिति।उपलक्षणीभूतेनकेनचिद्ध
र्मेणानुपूर्वीविशेषाणामविरोधविशेषणतावच्छेदकत्वपाभगवदिच्छायावगाहनस्योपगंतव्यत्वात्।यादृच्छिकसंकेतस्यचपदविशेषबोद्धव्यत्वविशिष्टवस्तुविशेषवि
षयकत्वेनवेदार्थत्वेमानाभावेनतद्विषयवस्तुनस्तत्तत्पदबोद्धव्यत्वतयाभगवदिच्छाविषयत्वमप्रामाणिकमिति।तादृशसंकेतविषयेपदवाचकत्वमेवयद्यपिचैत्रत्वावच्छिन्न
स्यचैत्रादिपदबोद्धव्यत्वेयथाजातिविशेषणांचैत्रादिपदजन्यबोधविषयोभवतिसाणाकारकक्षितसंकेतेप्राधान्येनभासतेनतथाप्राधान्येनसंकेतबोधविषयकभगवदिच्छा
यांभासतेकिंतुस्वत्वीस्याभिसादौस्वस्वत्वादिकमितोद्देश्यव्यवहारनियामकांवच्छेदकतांस्वपतद्विषयतांभाजनमेवेतितथापितत्तत्पदबोद्ध्यतायास्तत्तदर्थांशेभगवदि
च्छाप्रकारताभानेनतत्तदर्थस्यतत्तत्पदवाच्यतानियामकंनतूद्देश्यव्यवहारप्रयोजकविषयतैवेत्यदोषः।अधिकमन्यत्रविवेचितम्।उभयपदवाच्यमितिहृस्येति।पक्षस्यैकसोभ

घ४

पमतासिद्धत्वे वादिभ्यां स्वस्वमतसिद्धविभिन्नधर्मिणोरेव भावाभावरूपस्वस्वाभिमतसाध्यवत्तयोरन्यतमे संशयस्यैवानुपपत्तेरेकधर्मिणि भावाभावोभयज्ञानस्यैव संश-
यतादिति भावः। इह प्रकृतविप्रतिपत्तौ विधेय इति शेषः। धर्मी स्वतन्त्रत्वपरतन्त्रत्वरूपधर्मवत्त्वेनोपन्यस्तः। धर्मिपदं च विषयपदार्थविशेषणतया स्वार्थबोधकमिति ध्येयं। गता।
प्रकारत्वगर्भतादिति। तद्वत्तितत्प्रकारत्वरूपतादिति भावः। प्रामाण्यस्य। प्रामाण्यपदार्थस्य। तस्य चेति। प्रकारत्वस्य चेत्यर्थः। न्यायमत इति शेषः। प्रवः। ग्रहः। विषय इति। नियम-
न इत्यादि। तथा च तन्मते समवायादेः सांसर्गिकविषयताया अप्रामाणिकतया संसर्गतया तदंशे तदीयतत्संबंधविषयताशालित्वरूपं तदंशे तत्संबंधे तत्प्रकारकत्वं प्रा-
माण्यगर्भमसिद्धमिति समवायादिना रजतत्वादिमति समवायादिना रजतत्वादिप्रकारकत्वरूपं न्यायमतसिद्धं प्रामाण्यं परमतसिद्धमुभयमतप्रसिद्धं वाग्रहीतासंस-
र्गकधर्मधर्मिविषयकैकज्ञानत्वेन गुरुमतेपि स्वतोग्राह्यमिति कस्य पक्षतेति भावः। यद्यपि वस्तुतस्तत्त्वादिना प्रमापदप्रवृत्तिनिमित्ततावच्छिन्नस्य पक्षतायां निर्भरः। कृ-
तः। उभयमते प्रमापदप्रवृत्तिनिमित्ततावच्छिन्नप्रसिद्धमेव तथापि तन्मते प्रमापदप्रवृत्तिनिमित्तं त्वसंसर्गाग्रह एवेति मेवं तन्न वतन्मतेपि स्वतस्त्वबाधान्न्यायमतसिद्धप्र-
मापदप्रवृत्तिनिमित्तोपदर्शितधर्मस्य च तन्मतासिद्धत्वात्। प्रमापदप्रवृत्तिनिमित्तत्वस्य तत्प्रवृत्तिनिमित्ततया न्यायमतसिद्धत्वस्य वा न पक्षतावच्छेदकत्वं संभव एवं तत्प्रका-

नन्वित्यादि वं२ इत्येवं२

रकत्वस्योभयासिद्धत्वे विशेष्यतद्धर्म्मवत्वं तद्धर्मप्रकारकत्वं च यत्र व्यवसायानुव्यवसायेनानुमितास्वप्रकाशेन वागत्यतनइत्यग्रिममूलासंगतिश्चेत्साक्षेपसंगतिः निगर्वे
त्वित्यादेः पूर्वोक्तेत्यसाद्धि पाठे तु तद्वति तत्प्रकारकत्वतावच्छिन्नस्यैवैतत्पूर्वपक्षतावच्छेदकत्वेनाभिप्रेततादाक्षेपः साधु संगच्छते अत एव स्तु तास्ति वक्ष्यते त्वित्यादिक
त्वे प्रमापदस्य हि तन्निमित्तमनुभयसिद्धं पक्षद्वयमुक्तं उक्ताक्षेपपरीहारप्रकाशकतयैव पक्षतावच्छेदकस्योभयसिद्धतोक्तीर्न तु संगतेः न च प्रमापदस्य हि तन्निमित्तत्वेन प
क्षतेत्यस्य कानुपपत्तेर्दुर्वारत्वात्कथं तदेवलक्ष्याक्षेपपरीहारसंगतिरिति वाच्यं साकांक्षधर्म्मधर्म्मिविषयकैकज्ञानत्वरूपविशिष्टज्ञानत्वमेव तन्मते प्रमापदप्रवृत्तिनि
मित्तं न तु च पदार्थान्तररूपाकांक्षेवप्रविष्टानत्वसंसर्गाग्रह इति तस्य स्वतो ग्राह्यत्वासंभव इत्यभिप्रायकतया तत्संगतेः न च तादृशप्रमापदप्रवृत्तिनिमित्तस्य स्वतस्त्व
संभवेपि तन्मते तस्य प्रमात्वेन तत्प्रकारकत्वस्य स्वप्रकाशग्राह्यत्वमात्रसाधकमूलासंगतिर्दुर्वार एवेति वाच्यं स्वप्रकाशेन गृह्यते तत्र स्ववृत्तिमत्तद्धर्म्मप्रकारकत्वमित्य
स्य स्वविषयधर्म्मिसाकांक्षतद्धर्म्मावगाहित्वानत्वरूपविशिष्टज्ञानत्वार्थकत्वोपगमात् तदुत्तरं तद्विशिष्टज्ञानत्वं [illegible] वेति पूरणान्नासंगतिः वैशिष्ट्यस्य सम
वायादेर्विशिष्टज्ञानाविषयत्वे विशिष्टज्ञानत्वं दुर्वचमिति साकांक्षांशे इति अग्रहीतेति स्वविषयतद्धर्म्मिनिष्ठतत्संसर्गावच्छिन्नाभावप्रतियोगितयाग्रहत्व

श्रीराम·
१६

मात्रात्तद्धर्म्मावगाहित्वान्नत्वस्य तद्धर्म्मितात्तत्संबंधेन तद्विशिष्टज्ञानत्वरूपत्वादित्यर्थः अग्रहत्वमात्रात्वं च तत्कालावछिन्नाग्रहत्वमात्रात्वाभावः न तु तद्ग्रहत्वमात्रात्वस्याभावः धर्म्मिवृत्तितया अभावांतरग्रहासमानकालीनविशिष्टबुद्धावव्याप्तेः वास्तवतत्संबंधयथाकृतार्थधर्म्मिधर्म्मिपरं व्यवच्छेद्येति असंसर्गाग्रहकालीनइदंउरूपरूपधर्म्मधर्म्मिविषयकसमूहालंबनस्याग्रहीतासंसर्गकत्वेन यथाकृतार्थधर्म्मिधर्म्मिविषयकत्वेन तत्राव्याप्तेर्न्नादित्यर्थः न वा संसर्गाग्रहकाले भवन्मते तत्सिद्धविशिष्टज्ञानस्यापि सामग्रीसत्वात् समूहालंबनमेव नोत्पद्यत इति वाच्यं एवमप्युक्तस्थले कथंचिद्विशिष्टज्ञानोत्पादनियमसंभवेपि विभिन्नसंस्कारादिभिः समूहालंबनादिस्मरणादशायां विशिष्टस्मरणादशायां विशिष्टस्मरणाद्यसंभवात् अस्मन्मतेतिप्रायमतत्सिद्धौ ये संबंधप्रतियोगितानुयोगिताख्यस्वरूपसंबंधौ तदात्मकधर्म्मत्वधर्म्मित्वपरमित्यर्थः तयोर्न्नियमतत्सिद्धत्वकथनं च तदवगाहित्वघटितप्रामाण्यपसोभयासिद्धतासत्त्वचत्वापरंवेत्वीयतद्धर्म्मिविषयतानिरूपितताया तत्संसर्गावछिन्नधर्म्मित्वविषयतात्तन्निरूपितताया तद्धर्म्मविषयतानिरूपिततादृशधर्म्मत्वविषयतात्तच्छालिज्ञानत्वं न च तत्संबंधेन तद्विशिष्टज्ञानत्वं धर्म्मित्वे वास्तवतद्धर्म्मिनिष्ठत्वमुपेस्य तद्विषयतायां तद्विषयतानिरूपितत्वनिवेशान्नेदं रूप्यं नेदं रजतमिति समूहालंबनबुद्धेरिदंत्वत्वावछिन्नांशे रजतत्वरूप्यत्वविशिष्टबुद्धितापत्तिः नच धर्म्मियकिंभे

कु·वि·गी·
२

ता१

देन धर्म्मिभेदान्नेयमापत्तिरिति वाच्यं तथाप्येकस्मन्नेकैव विभिन्नरूपेण यत्र विभिन्नविशेषणविशेष्यतानां तादृशसमूहालंबनविशिष्टबुद्धौ वैपरीत्यस्य दुर्वारत्वात् अस्मन्म
ते च तद्धर्म्मावच्छिन्नांशे विशिष्टधियो लक्षणे तद्धर्म्मावच्छिन्नाया धर्म्मिविषयताया निवेशनीयतया अतिप्रसंगानवकाशात् तद्धर्म्मत्वे वास्तव तद्धर्म्मिनिष्ठत्वमुपेक्ष्य तदुभयोत्त
योर्निरूप्यतानिरूपकभावनिवेशाद्धि भिन्नरूपावच्छिन्नस्यैकस्य यत्र विभिन्नविशेष्यविशेषणतानां तत्र न वैपरीत्यप्रसंगः तद्धर्म्मावच्छिन्नविशिष्टबुद्धित्वलक्षणे तद्धर्म्मावच्छिन्नाया
धर्म्मिविषयताया एव निवेशात् तद्धर्म्मिविषयतानिरूपितधर्म्मित्वविषयतानिरूपिततद्धर्म्मविषयताया एव तद्धर्म्मिविषयतानिरूपितधर्म्मत्वविषयतानिरूपितधर्म्मविषय
ताया एव वा निवेशो ऽजननमित्यादिबुद्धेरजनकत्वादौ ऽजनकत्वादिविशिष्टबुद्धित्वापत्तिरिति धर्म्मित्वधर्म्मत्वयोर्द्वयोरेव विशिष्टबुद्धौ भानमंगीकृत्य तदुभयावगाहिताघटितलक्षणाद
ः धर्म्मित्वावान्दंडइत्यादिज्ञानस्यादंडादिविशिष्टबुद्धित्वापत्तेः एतावद्द्वयपर्य्यंतलाभायासंसृत्वधर्म्मत्वयोश्च संसर्गविधयाविलक्षणविषयतामुपगम्यैव निवेशनीया अ
न्यथा धर्म्मितादिप्रकारकस्यपुरुषनिष्ठधर्म्मिताप्रतियोगिकधर्म्मितावान्दंडइत्यादिज्ञानस्यादंडादिविशिष्टबुद्धित्वापत्तेः एतावद्द्वयपर्य्यंतलाभायासंसर्गग्रहोपादानं अस्म
न्मतसिद्धविशिष्टज्ञानत्वकार्य्यकारितन्मतसिद्धधर्म्मधर्म्मिविषयकतानहपीष्टधर्म्मधर्म्मिविषयतयोरपि धर्म्मत्वधर्म्मित्वविषयतानिरूपितत्वोपगमात्तद्वारणाय धर्म्मिविष

दूर

विषय

श्रीराम
२

पत्तायां स्वीयत्वत्वाभावयमेकपदे इदमेव च प्रमापदप्रवृत्तिनिमित्तत्वे न तन्मते प्रसक्तः अतएव विषयतायां स्वीयत्वं परित्यज्य धर्म्मितानहत्वं निवेशयताद्रूप्ये गौरवप्रसक्तमिति वाच्यम् अभि

५२ प्रेतं न तु धर्म्मित्वावगाहित्वेन तन्मते सिद्धमिति साशंकां परिहरति तन्मते इति विषयत्वात् विषयतायाः निर्विवादत्वात् विशेषणत्वविशेष्यत्वयोरेव धर्म्मितावगाहित्वेन तन्मते सि

द्धमिति साशंकां परिहरांत्व दिरूपत्वादिति शेषः तद्वति तत्प्रकारकत्वस्याप्ययमेवार्थ इत्याह तथा चेति ननु घटादिघटत्वादिप्रकारकज्ञाननिष्ठप्रमापदप्रवृत्तिनिमित्तं घटत्वादिभेदेन भिद्य

ते तदाकृत्वापि प्रमापदप्रवृत्तिनिमित्तं न प्रमापदप्रवृत्तिनिमित्ता स्वग्राहकयावत्सामग्रीघाट्यत्वं घटघटादिज्ञानग्राहकसकलसामग्रीणामेव प्रमापदप्रवृत्तिनिमित्ता स्वग्रा

हकयावत्सामग्र्यन्तर्गतत्वात् घटादिज्ञाननिष्ठप्रमापदप्रवृत्तिनिमित्तस्य च घटादिज्ञानग्राहकग्राहकताघटत्वादिप्रकारकज्ञानं विशिष्य निवेश्यते [illegible]हकयावद्ग्राह्यत्वसाध ७

अ४ नेप्यंशतो बाधोद्धर्षः एव[illegible]तः सकलज्ञाननिष्ठं प्रमापदप्रवृत्तिनिमित्तमेकमेवांगीकार्यं तथा च गृहमते प्रामाण्यग्राहकत्वविशेषणावैयर्थ्यं अयं घट इत्यादिज्ञाने घटत्वाप

शो प्रामाण्यग्रमस्यापि स्वनिष्ठं किंचिदं शीयप्रामाण्यग्राहित्वात्तन्न चोक्तप्रामाण्यग्रमतन्मते स्वविषयकज्ञानात्मको घट इति व्यवसायस्तदगृहीतासंसर्गकाप्रामाण्यापस्थि

तिष्वतत्वाप्रामाण्यापापस्थिर्घटत्वाभावादिरूपाप्रामाण्यघटत्वप्रकारांशीयप्रामाण्यगृहीतुं घट इति व्यवसायः घटत्वप्रकारांशे प्रामाण्यानवगाहनेकस्मिन्नंशे प्रामाण्यगृहीता

स्व१दे

ष्टिन्ति साध्यं घट इति व्यवसायस्य घटत्वप्रकारकत्वावत्त्वप्रामाण्यस्य मध्यमम्मितावच्छेदकीभूततज्ज्ञानवृत्तीदंत्वादिप्रकारकत्वात्तदंश एव प्रामाण्यावगाहित्वासंभवादित्याशं
क्यां निरस्यति ज्ञानप्रामाण्यपदे इति तत्तद्व्यक्तिपरे इति घटत्वादिप्रकारकज्ञानघटत्वादिमद्विशेष्यकत्वविशिष्टघटत्वादिप्रकारकत्वरूपविशेषभेदभिन्नप्रामाण्यपरे ननु प्रामा
ण्यपदं सर्वसाधारणैकप्रामाण्यपरमित्यर्थः प्रत्येकसाध्याभिसंबन्धोऽसंभवत इति घटत्ववति घटत्वप्रकारकत्वादिरूपप्रत्येकप्रामाण्ये तन्नत्वामाण्याश्रयग्राहकयावद्रूपाद्घटत्व
रूपसाध्यसंबन्धोऽनुमितौ विषयीक्रियत इत्यर्थः अयमाशयः प्रमापदप्रवृत्तिनिमित्तं तद्वति तत्प्रकारकत्वं सर्वसाधारणमेकमिति न संभवद्युक्तिकं न तद्दृश्यमेतावताऽपि तु घट
त्वघटत्वादिभेदात् भिन्नमेव एवं च तत्तस्मिन् सामान्यतः प्रमापदप्रवृत्तिनिमित्तत्वेनोपस्थितेऽपि घटत्वादिरूपप्रकारस्थिति तत्प्रामाण्ये तत्तत्प्रामाण्याश्रयग्राहकयावद्रूपत्वम
वाधितमेवानुमितिविषयः स्वाश्रयत्वेनैव ज्ञानस्य साध्यवत्कतया एकप्रामाण्येऽपरप्रामाण्याश्रयग्राहकाभावत्वेऽपि क्षतिविरहात् प्रमापदप्रवृत्तिनिमित्ताश्रयत्वेन ज्ञान
निवेश एव उक्तरीत्या तद्ग्राहकयावद्रूपत्वस्य कचिदपि प्रामाण्ये निर्वाहायोगात् स्वपदार्थस्य तत्तत्प्रामाण्यरूपत्वेऽपि तत्तत्प्रामाण्याश्रयग्राहकयावद्रूपत्वतानामन्यूनमन्यून
मत्वेन साध्यत्वोपगमादंशतो बाधस्याप्यनवकाशात् तथा चाप्रामाण्यग्राहकत्वविशेषणाप्रवेशे तत्तत्प्रामाण्ये तत्तत्प्रामाण्यविशेषप्रामाण्यभ्रमरूपतदाश्रयग्राहका

सतंपक्षतुगतं २

पं २ दृ र्थ

श्रीराम·

ओंम मश्री
थात्वेन याबाधोद्धृष्परिहरस्त्वेनिन्नतद्वैयर्थ्यमिति केचित्तु बाधेन प्रमापदप्रवृत्तिनिमित्ताश्रयग्राहकग्राह्यावत् सांध्यात्वस्य प्रामाण्ये साधनासंभवात् ज्ञानग्राहकसामग्रीत्वावच्छेदेने
व प्रमापदप्रवृत्तिनिमित्तग्राहकत्वं मीमांसकैः साधनीयं तथा च गुरुमते स्वाप्रामाण्यग्राहकपदवैयर्थ्यमिति शंकयानुकूलफक्किकामवतारयति चतुर्थविशतिपत्रस्यानंतरं प्रत्येकमेव
मग्रीकत्वात् ज्ञानरूपधर्म्मिग्राहकसामग्र्याः श्यामात्मा ग्राहकग्राहकत्वात्तस्य संशयो भवितुमर्हतीति शेषः विपरीतनिश्चयाभावात् सत्वादिति भावः इत्येवेत्येवकारेण धर्म्मि
धीव्यवच्छेदः कारणं संशयस्य न तु संशयत्वावच्छिन्नं प्रति धर्म्मिधियो हेतुत्वानभ्युपगमेऽपि स्त्रावोपपत्ति धर्म्मिधियो हेतुतया संशयस्य चैककोटावावोपत्तनियमेन तत्र धर्म्मि
ज्ञानापेक्षा दुर्वारैवेत्यक्रमेवेति कथमेतदित्यत आह तत्र हीति हेतुरिति प्रमाणाभावादिति शेषः न चोपस्मारकतत्कोटिसहचरितधर्म्मवद्धर्म्मिज्ञानान्वयव्यतिरेकानुवि
धानमेवोपधर्म्मिज्ञानहेतुतायां मानमित्याशंक्याह सादृश्यमिति तत्तत्कोटिमद्वृत्तिधर्म्मवत्वं धर्म्मिताऽस्यार्थः तज्ज्ञानकत्वेनारोपजनकविशेषणज्ञानत्वेनाहेति धर्म्मिज्ञान

श्रीराम·
७२

स्वभ्रमसंशयहेतुतां व्यवस्थापयतीत्यर्थः तद्धर्मीन्द्रियसन्निकर्षेति अनेकधर्म्मिष्वेव संशयादित्यर्थः अत एव धर्म्मिनियमानुरोधादेव व्याघातो यान्तरेपि संशयभिन्नाव्योपि तत्रालोकधर्म्मीन्द्रियसन्निकर्षस्थले धर्म्मिधीनियामकं कस्य चिदेव धर्म्मिणो ज्ञानं न तु सर्वस्येति नियमनिर्वाहकं विषयमाहात्म्यादिरूपतयेति तत्तद्विषयतत्तत्कालात्मकविशेषसामग्रीरूपतया तेषां धर्म्मिधीनियमकाली अननुगततया तत्तत्संशयव्यक्तित्वावच्छिन्नप्रत्येककल्पनीयहेतुताकतया अनुगतेति तत्तद्धर्म्मिकसंशयत्वरूपतामान्यधर्म्मावच्छिन्नप्रतिसंभवहेतुताकेत्यर्थः तथा संशये धर्म्मिभाननियामिकास्त्विति शेषः संशयनियामकतया सिद्धेन तत्पूर्वकालीनधर्म्मिज्ञानेऽननुगतकारणताकल्पनागौरवं तु फलमुखत्वतया न दोष इति भावः धर्म्मिधीसामग्रीत्वेनानुगमादिति उक्तधर्म्मिकसंशये तत्तद्धर्म्मिविषयज्ञानाव्यवहितक्षणताविशिष्टत्वेनानुगमय्य तत्तद्धर्म्मिकसंशयाव्यवहितपूर्ववर्त्तिनामात्ममनोयोगादीनां हेतुकल्पनादित्यर्थः तथा च तत्तद्धर्म्मिभाने नियमेन धर्म्मिधियो हेतुताकल्पने कारणतावच्छेदकगौरवं चाकिंचित्करं उक्तगुरुरूपावच्छिन्नस्य नियतपूर्ववर्त्तिता उभयसिद्धतया कल्पनालाघवसत्त्वात् यत्तत्क्षणोत्तरं तत्तद्धर्म्मिकः संशयस्तत्तत्क्षणस्य तत्तद्धर्म्मिविषयकज्ञानाव्यवहितपूर्वत्वविरहे तत्तत्कालीनसामान्यानुतादस्थ्य अननुगततत्तद्धर्म्मिधीत्वसामग्रीविरहकूटप्रयुक्तः धर्म्मिधीहेतुतावादिनापि तत्तद्धर्म्मिविषयकज्ञानोत्पादनियामकाननुगतसामग्रीकल्पनाया आवश्यकत्वात् अन्यथातिप्रसंगस्तु

वीरत्वादिति भावः संशयेप्याव्याप्यसामान्येवान धर्म्मिज्ञानसामग्र्याः पृथक्कारणत्वकल्पनामपि तुरगादौ वेगेन गच्छत्तरं दिद्यासत्तिकूटस्य कल्प्यधर्म्मिण्येव बाधितधर्म्माणामपि विशिष्टज्ञानानुदयात्तद्धर्म्मिकविशिष्टज्ञानसामान्यं प्रत्येवात्र तुरगत्वात्मप्रतियोगादिव्यक्तीनामुक्तरीत्यानुगमय्य हेतुताया आवश्यकत्वात्तत्तन्न एवोपपत्तेरित्याह किंचेति अन्यथा विशिष्टबुद्धौ अवच्छेदकगौरवेण विशेष्यज्ञानसामग्र्या अहेतुत्वे तत्रापि धर्म्मविशिष्टज्ञानेपि मानांतरमिति धर्म्मिधीहेतुतायामित्यादिः मूले कोट्युत्कटत्वं चेति धर्म्मिविशेषप्रकारीभवत्कोटिविशेषांशे संभावनाया उत्कटत्वनियमश्चेत्यर्थः तादृशमेव नियमं दर्शयति आलोकयन्निष्टधर्म्मस्येति पन्नधर्म्मिणि ज्ञायमानधर्म्मस्येत्यर्थः भूयः सहचारः भूयान्सहचारग्रहः भूयःस्वस्थाने भूमसहचारग्रहो वा आसीदिति शेषः यद्धर्म्मसहचरिते जिग्रहीतपकोटिसहचरितेत्यर्थः तत्कोटाविति तत्र धर्म्मिणीत्यादिः तथाच तद्धर्म्मिप्रकारतापन्नतत्कोट्यंश एवेत्यर्थः तदुभयमपीति तादृशोभयस्थलीयकोट्युत्कटत्वनियमोपीत्यर्थः धर्म्मिज्ञानसाध्यमिति तादृशतादृशधर्म्मिज्ञानहेतुताधीनमित्यर्थः तदभावे तद्धेतुताकल्पने तस्यातन्निर्वाहः अथ यत्र पुरुषत्वाभावसहचरितधर्म्मापेक्षयात्राधिकधर्म्माः पुरुषत्वसहचरितधर्म्मिणि गृहीतास्तत्र पुरुषत्वांशे औत्कट्यस्य योजिकाया सामग्री तस्याः पुरुषत्वसहचरिततावद्धर्म्मग्रहसत्वे तदपेक्षया पुरुषत्वाभावसहचरितन्यूनधर्म्मग्रहदशायामप्यसत्वात्तदानीमपि पुरुषत्वांशे उत्कटसंशयापत्तेरिति चेन्न पुरुषत्वांशे उ

त्कटसंशयंप्रतिपुरुषत्वाभाववत्सहचरितधर्म्मद्वयादिमद्धर्म्मिज्ञानस्यपुरुषत्वादिसहचरितधर्म्मोभयादिमद्धर्म्मिज्ञानविरहविशिष्टस्यप्रतिबंधकत्वोपगमात्एवमपिपुरुषत्व
तदभाववत्सहचरितैकैकधर्म्मवत्ताज्ञानकालेउक्तप्रतिबंधकासत्वेनपुरुषत्वाद्यंशेउत्कटकोटिकस्यसंशयस्यापत्तेस्तद्वारणायतत्तदंशेउत्कटसंशयंप्रतितत्तत्सहचरितधर्म्मद्
यवद्धर्म्मिज्ञानस्यापिहेतुतायाआवश्यकत्वात्तादृशधर्म्मद्वयादिमद्धर्म्मिज्ञानस्थलेपितादृशकारणसत्वेनोत्कटसंशयनिर्वाहःईदृशरीत्याभूयःस्थलसहचरितैकधर्म्मवद्धर्म्मि
ज्ञानस्यापिकारणत्वंप्रतिबंधकत्वंचस्यमूलेएतादृशसंशयेउत्कटसंशयेतादृश्याहेतुतायामपिधर्म्मिज्ञानविषयहेतुतासिद्धावपिसामान्यहेतुतायासंशयसामान्येधर्म्मिज्ञानसा
मान्यहेतुतानायातीतितथाचधर्म्मिज्ञानंविनानश्वामारोपसंशयनिर्वाहःकोप्युत्कटत्वभ्रमनत्संशयसोत्रोपगंतव्यत्वात्तावतापुनरकालविषयसंशयोपपत्तेरितिभावःसंश
यमात्रमपिसंशयत्वमपिनतंत्रंनधर्म्मिज्ञानसामान्यजन्यतावच्छेदकंआरोपमात्रंसंशयसाधारणमारोपत्वंलाघवादितिशेषःएवंचकश्चिन्नमारोपसामग्र्याधर्म्मिज्ञानघटितत्व
मप्यभयमितिभावःअत्रसंशयेधर्म्मिनियमवत्धर्म्मिनियमादिवत्आरोपनियममेवविहरणोतियद्धर्म्मसहचारेतितादृशापेक्षेतिआरोपआरोप्यसहचरितधर्म्मवद्धर्म्मि
ज्ञानापेक्षेत्यर्थःअथकिमिदमुत्कटत्वमित्याकांक्षायामाहउत्कटत्वंचेतिअव्याप्यवृत्तिसंशयजातिरितितद्धर्म्मिविषयकत्वावच्छिन्नतत्कोटिविषयकत्वावच्छेदेनसंशयवृत्तिजा

त्तिरित्यर्थः यत्र धर्म्मिणि पशुरूपत्वं संभावयामीति यत्र प्रतीतिस्तत्रापि पशुरूपत्वाभावं संभावयामीति प्रतीत्युदयात् तत्तत्कोटिविषयकविशेषावच्छिन्नत्वाज्जातिविशेषवत्त्वापा
स्मादृशप्रतीतिविषयतावच्छेदकत्वान्नद्व्याप्यवृत्तित्वमिति भावः जातेर्व्याप्यवृत्तितानियमस्य सिद्धांतसिद्धत्वात् तद्दुर्वोधेनादृशादृशधर्म्मिविषयकत्वमिति तत्कोटिसहचरित
रूपो धर्म्मादिमद्धर्म्मिविषयकत्वमित्यर्थः यद्यपि जनकज्ञानेपि तादृशधर्म्मिविषयकत्वसत्त्वात् तत्तत्र यथाधर्म्मिनिष्ठतादृशधर्म्मादिमत्त्वमहिताधर्म्मिणस्तज्ज्ञानविषयताश्रयो
जकसन्निकर्षादिघटितसामग्रीप्रयोजकात्तथा संशयेपि तत एव वृत्तिनिर्व्वाहे तत्सहितसंशयत्वस्य जन्यतावच्छेदकत्वमिति निर्युक्तिकं अन्यथा चेत्तावलौकिकतद्धर्म्मिविषयकत्वादे
रपि कार्य्यतावच्छेदकत्वप्रसंगात् तथापि यत्कोटिचरितत्वयो धर्म्मधर्म्मिविषयकसंशयः तत्कोटिनिरूपितविषयिताविशेषस्यैवोत्कटत्वमित्येवाभिमतं दोषान्तरात्तत्संशय इ
ति मूलस्य दोषान्तरं व्याचष्टे दोषान्तरादिति साक्षात्कारी स्यादित्युक्तिकापाठ उपाध्यायव्याख्यानं दूषयितुमुपन्यस्यति प्रत्यक्षेति प्रत्यक्षरूपसाक्षात्कारित्वग्रहणायाइत्यर्थः तद्योग्यता
वच्छेदकविशेषजत्वं तादृशमेव साक्षात्कारित्वग्रहयोग्यमेव तद्योग्यत्वं च न हि दिव्यलौकिकसन्निकर्षजन्यत्वं अत एवास्तु एवं शोवं शोवगम्रमेणास्पर्शिनस्सोपगताभावज्ञानस्य वि
रोधिता विपरीतज्ञानं तदभाववत्ताज्ञानं अतः शंखत्वादिदर्शनस्य न पीतत्वादिभ्रमविरोधिताऽत्र पीतत्वधीः पीतत्वविरोधिधीः पीतत्वाभावधीः साक्षात्कारिरूपालौकिकप्रत्यक्षरूपाद्वानु

मानिकी शंखत्वादिलिंगकानुमितिरूपा तत्रापि ज्ञाने प्रतिबंधकत्वादिति शेषः इत्यतः अनुमित्यादिसाधारणबाधप्रतिबध्यत्वे लौकिकसन्निकर्षाजन्यत्वस्यैव दोषविशेषाज-
न्यत्वस्यापि तंत्रत्वात् दोषविशेषजन्यसाधारणाधीरणाधीप्रतिबंधकत्वे हेत्वतंत्रासत्वादित्याशयात् न च साक्षात्कारिविपरीतज्ञानप्रतिबध्यतावच्छेदककोटौ दोषविशेषाजन्यत्वनि-
वेशे शंखेऽपीतत्वसाक्षात्कारद्वितीयक्षणे दोषसमवधानेन तत्तृतीयक्षणे पीतभ्रमानुपपत्तिरिति वाच्यं तत्र बाधेनाशे षसेव तद्भ्रमात् अन्यथा तादृशदोषजन्यस्य शंखे पीतत्वग्रह-
स्यउपनीतभानरूपस्य बाधसामान्यप्रतिबध्यतया लौकिकप्रत्यक्षरूपेणाप्रसिद्ध्या ज्ञापकसंभवेन भ्रमे समानेंद्रियजन्यविपरीतधियो विशेषप्रतिबंधकताविलयप्रसंगात् भव-
तीति तादृशसत्वेऽपीति शेषः न चैवमपि दोषविशेषजन्यधियो बाधसामान्याप्रतिबध्यतया ततः श्यामात्मसंशयाभावे दित्सांशं खासमाधानापत्तिरिह चेति मानसे मनोलौकिक-
सन्निकर्षजन्ये साक्षात्कारे विशेषदर्शनसत्वात् समानेंद्रियजलौकिकप्रामाण्यमावाभावसत्वात् भ्रमः दोषविशेषाजन्योऽपि मानसो बोधः उक्तयुक्त्या समानेंद्रियजन्यबाधनि-
श्चयप्रतिबध्यतावच्छेदककोटौ दोषविशेषाजन्यत्वस्यानिवेशादिति भावः अथ पित्तादिदोषसमवधानदशायां श्वेत्याद्यंशे उपनीतभानात्मकस्य श्वेतशंखवानयं देश इत्याकार-
कशंखादिलौकिकचाक्षुषप्रत्यक्षस्य सत्वेऽपि श्वेताभाववानयं देश इत्यादिचाक्षुषभ्रमोत्पत्तेः समानेंद्रियजन्यमपि प्रकारतावच्छेदकांशे उपनीतभानात्मकज्ञानं साक्षात्कारि

भ्रमविरोधीतिप्रकारितायांशेलौकिकमानसंघटत्वादिरूपविषयांशेउपनीतभानरूपतयादोषविशेषप्रामाण्याभाववन्मानसंप्रतिबध्नीयादितिचेत्तत्रग्राहदृशविशेषणोपरागे
गेवह्निप्रत्यलौकिकप्रत्यक्षंतादृशविशेषणांशेउपनीतभानरूपमपितल्लौकिकप्रत्यक्षंतद्विपरीतसाक्षात्कारविरोधिअन्यथापीतादिरूपप्रतियोग्यंशेउपनीतभानात्मकस्यशं
खोनपीतइत्याकारकपीताद्यभाववल्लौकिकप्रत्यक्षस्यपीतादिसाक्षात्कारप्रतिबंधकतानुपपत्तेःविशेष्यताप्रकारितयोर्विषयताविशेषितयोलौकिकप्रत्यक्षानुदयाद्धिविषयांशे
उपनीतभानमपिप्रामाण्यस्यलौकिकप्रत्यक्षंप्रामाण्याभाववन्मानसप्रतिबंधकमितिनिष्प्रत्यूहमेवेतिअप्रमानवेतिभ्रमोनवेत्यर्थःसंशयानुच्छेदादितितादृशसंशयादेरवि
षयसंशयोभविष्यतीतिशंकायामाहअनिराकरणादित्यर्थःअप्रामाण्याभावानिश्चयेभ्रमत्वाभावानिश्चयेअप्रामाण्यसंशयेदोषविशेषजन्येभ्रमत्वसंशयबाधकाभावात्
बाधकाभावपक्षेऽसंभवात्तदभाववद्व्याप्यादिनिश्चयप्रतिबध्यतावच्छेदकगर्भेदोषविशेषाजन्यत्वनिवेशनियमात्अन्यथाशंखत्वादिप्रत्यक्षस्यपीतत्वादिगोचरसाक्षा
त्कारेभ्रमप्रतिबंधकतादितिभावःनचैवमपीतत्वादिसाक्षात्कारस्यैवसाभावादितिसाक्षात्कारित्वभ्रमाप्रतिबंधकतपातनत्वेनतादृशभ्रमापत्तिरपिदुर्वाराकथंचिन्नद्दार
णेचक्षमात्वग्रहदशायांभ्रमत्वसंशयोऽपिदुरुपपादःस्यादित्यतआहनत्वपीतत्वेतिअपीतत्वग्रहकालेअपीतत्वसाक्षात्कारकालेश्वेतत्वग्रहनियमात्श्वेतसाक्षात्कारनि

यमात्तदुभयसामग्र्याः समनियमादिति भावः स्वप्नेतद्भ्रमोभिवर्त्ततइतिसमानेद्विपज्ञतदभावग्रहसत्वनियमादितिभावः तथाइतिसंभवतिनेतियोजनाग्रहसामग्रीभेदा
दितिपरमतेपिभावरूपप्रामाण्यस्यैवस्वतोग्राह्यतयाग्रहग्रहकालेभ्रमत्वाभावग्राहकसामग्र्यानियमादित्यर्थः अप्रामाण्यस्यभ्रमत्वरूपस्याप्यभावोयदिप्रामाण्यंस्यात्तदैवप्रा
माण्यग्रहसामग्रीकालेभ्रमत्वाभावग्रहसामग्रीनियमःस्यात्तदेवनेत्याह अप्रामाण्येतितदभाववतीत्यादिग्रंथस्येत्यनेनभावरूपत्वमविरुद्धंतथात्वाभावानात्मकस्यापिप्रामाण्य
स्यनिश्चयेयथाभ्रमत्वसंशयोत्पादशंकानावतरतिनिश्चयेयथाभ्रमत्वंमाकुलंतेतस्मादित्यादिनाक्षिताहृशम्नह्विपरीतनिश्चयोविरोधीतिसाक्षात्कार्योद्यात्याभावाद्वायास्यवनिश्चयोविरोधी
तिनियमइत्यर्थः निश्चयरूपविशेषोपादानलभ्यंतदन्यज्ञाननिरूपितप्रतिबंधकतायांविपरीतविषयकत्वाद्यनियतत्वरूपमर्थसत्पतिनतुसंशयइतिसंशयेपिदोषविशेषजन्यो
पिसंशयेविपरीतविषयत्वंयात्याभावाद्विषयकत्वंसाक्षात्कारित्वसावीजत्वाभिधानेनचदृष्टांतविधयाश्रुतेप्रामाण्यनिश्चयस्यसाक्षात्कारित्वपातनस्यसंशयप्रतिबंधकतावी
जत्वेपिभ्रमत्वसंशयानिर्वाहात्अप्रामाण्यसंशयःभ्रमत्वसंशयःतद्धिरूढप्रामाण्यनिश्चयात्तभ्रमत्वप्रमात्वाभावोभयविरुद्धप्रमात्वनिश्चयात्कदाचित्प्रामाण्याग्र
हइतिप्रामाण्यसंशयोयदुत्तरमनुभवसिद्धः तत्रप्रामाण्यप्रमानाभावेसतीत्यर्थः विप्रतिपन्नावप्रामाण्यग्राहकपदेनप्रामाण्यग्रहप्रतिबंधकसमवहितत्वस्यविवक्षणा

अ·मि·दी·ग·
७६

न दोषसमवहितज्ञानग्राहकसामग्र्या प्रामाण्याग्रहविनाबाध इति भावः तद्वेवमपि यत्र दोषोऽप्रामाणिकस्तत्र परेषामनभ्यासदशाजातेपि व्यवसाये प्रामाण्यस्य स्वग्रहतयाह्यानुभविकः प्रामाण्ये संशयो नोपपद्येतैवेत्यत आह दोषस्येति दोषत्वस्येत्यर्थः फलैकोन्नेयतया प्रमाप्रतिबंधरूपफलानुरोधकल्पनीयतया तद्दशायामनभ्यासदशातद्विज्ञातैवेसादिमूलस्य जन्मनो दोषत्वखंडनपरतया व्याख्येयत्वात्तत्संशये जन्मपर्यंतानुसरणं उपाधिपुरस्कारेण कस्यचित् प्रामाण्यग्रहे दोषविधया प्रतिबंधकत्वेपि संशयोपपत्तेर्जातिपुरस्कारेण दोषतापाःशंकायामनवोहात्तत्पुरस्कारेण दोषतापाःखंडनसंगतमतो व्याचष्टे जात्या जन्मनेति च भेदे तृतीयांतद्वयपस्यकश्चिद्दिरिसत्र तथा च जन्मरूपः कश्चिद्दोषो नेत्यर्थो न लभ्यते इत्याशयेन दर्शितशंकानिराकरणपरतां स्फुटयति अनभ्यासेति प्रामाण्यग्रहकालीनजन्मनः तादृशजन्मत्वावच्छिन्नस्य तत्कालीनप्रामाण्याग्रहपर्यवसितत्वतया वाच्यं विशिष्य प्रामाण्याग्रहप्रयोजकं वाच्यं प्रतिव्यक्तीति प्रतिव्यक्तिविश्रांतेत्यर्थः दुर्ग्रहत्वादिति गौरवेनेत्यादिमतांतरमाह नहीति दोषत्वजातिन प्रामाण्यग्रहप्रतिबंधकतावच्छेदकानुगतरूपवान न तथा दोष इति शंकास्पद[illegible]मपि न तथा चाननुगतदोषकल्पने गौरवान्न प्रामाण्यस्य लौकिकत्वस्य ह्यायोग्यत्वकल्पनमेवोचितमिति भावः मूलेन तद्विषयमिति ज्ञानत्वघटविषयकत्वविषयकानुव्यवसायत्वमित्यर्थः अनन्यथासिद्धमिति ज्ञानत्वघटविषयकत्वांशेन

श्री राम·
७६

न्यथासिद्धत्वंपितमित्यर्थः अन्यथासिद्धत्वंभ्रमत्वाभावः तथा चज्ञानत्वघटविषयकत्वविषयकानुव्यवसायत्वरूपतदंशेभ्रमत्वव्यावर्त्तकधर्म्मस्यानुव्यवसायेतदनु
व्यवसायेनग्रहणात्तु तन्नतदंशेभ्रमत्वसंशयइतिनव्यवसायज्ञानत्वघटविषयकत्वसंदेहइतिवसायेभ्रमत्वसंशयानुदयादित्यर्थः सांप्रदायिकास्तु अनुव्यवसायत्वस्य
प्रमात्वनियतत्वेनप्रमात्वव्याप्यत्वग्रहेणाप्रसंशयइत्यत्रहेतुत्वेनैतद्वचः यदनुव्यवसायविषयइत्यस्यातन्मथाइतिशेषः तथा च यद्धत्वांशेप्रमात्मकस्यैवानुव्यवसाय
स्यविषयइत्यर्थ इतिव्याचक्षते तद्विषयत्वतादृशविषयस्यघटविषयकत्ववैशिष्ट्यमितिवस्तुगत्यायोघटस्तद्विषयित्वमित्यर्थः विषयित्ववैशिष्ट्योपादानंघटत्वस्योपल
क्षणत्वंननुविशेषणतामितिलाभायघटत्ववत्वंविषयस्येतिव्यवसायविषयांशेभासमानघटत्वमित्यर्थः तत्तद्विषयः यादृशविषयांशेअनुव्यवसायस्यप्रमात्वनियमस्ता
दृशविषयोनेत्यर्थः अघटस्यापिप्रमात्मकव्यवसायविषयस्यघटत्वेनावगाहनादितिभावः इति इतिसंशयपर्यवसन्नेसंशयेघटत्वविशिष्टविषयकत्वसंशयेयथाश्रु
तेप्रामाण्यसंशयोपपत्तावेवतदधीनविषयसंशयनिर्वाहेयाथार्थ्येनतदुपादानानौचित्यादसंगतिः नचव्यवसायेप्रामाण्यसंदेहेपि अनुव्यवसायस्याव्यवसायवत्त्वि
भ्रमतेधर्म्मिणिघटत्वादिनिश्चयरूपतया तत्रघटत्वांशेअप्रामाण्यसंशयंविनास्वविषयघटत्वसंशयासंभवइत्यनुव्यवसायेउक्तरीत्यातदंशेऽप्रामाण्येसंशयनुपपा

घतत्संशयोपादानस्तुचितमितिवाच्यंव्यवसायेघटोवह्निविशेष्यकघटत्वज्ञानत्वावच्छेदेनश्यामारोपसंशयेऽनुव्यवसायस्यापिघटोवह्निनिष्ठघटत्वसंशयविरोधित्वगमाद
नुव्यवसायेघटत्वांशेश्यामारोपसंशयांतरानुपगमात्यथाव्याख्यातपक्षेतुअप्रमापिसंशयःश्यामारोपसंशयप्रवृद्धिषयसंशायकोविशेषणसंशयतयाश्यामारोपसंशयप्रयो
जकत्वेस्तुप्रयादिनःश्यामारोपसंशयमुपपादयातेइहेतिअनुव्यवसायानुपहीनेपीतिअनुव्यवसायेश्यामारोपरूपविषयांशेभ्रमत्वरूपसंदेहादितिशेषःज्ञानत्वघटविषय
त्ववैशिष्ट्यमेवेत्येवकारात्श्यामारोपांशेश्यामारोपनियतत्वावधारणाव्यवच्छेदलाभःश्यामारोपसंशयपइत्यत्रचतस्यैवहेतुत्वंतन्नैवहेतुःयामारोपज्ञानस्यश्यामारोपविनापिदर्शना
दितिश्यामारोपमूलेप्यनुव्यवसायस्यघटत्वादिविशेषितधर्मिविशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वावगाहितायादर्शनादितितदर्थःघटविषयकत्वेतस्यपूर्ववद्व्याख्या
नंननुश्यामारोपसंशयानुपपत्तिप्रस्तावेतमनुपपाद्यश्यामारोपसंशयानुविधायेसंशयपइत्यादिशंकायाःकथमवतारःश्यामारोपसंशयस्यविषयसंशयानुपपत्तिःसमा
नधर्मदर्शनादेवेतिकोटिद्वयसहचरितत्वज्ञानाज्ञानविषयत्वरूपधर्मज्ञानघटितसामग्रीततएवेत्यर्थःतादृशसामग्र्याःश्यामारोपसंशयापेक्षायाःक्वअभ्यासदशायां
श्यामारोपसंशयायोगान्नातिप्रसंगःएवमर्थनिश्चयदशायांश्यामारोपसंशयान्वयव्यतिरेकयोरर्थसंशयान्वयव्यतिरेकप्रयोजकत्वानुभवादर्थनिश्चयोत्तरंतत्संशये

प्रामाण्यसंशयहेतुत्वमावश्यकमितिसत्त्वेनतस्यासार्वत्रिकतादिनाऽभिहितेस्वादिनानहानिःतत्त्वाकारकत्वस्यसंशयपालोपेनसंगच्छतेअतःप्रामाण्यसंशयहेतुताग्रा
हकाव्यपव्यतिरेकखंडनेननतस्याहेतुत्वव्यवस्थापनपरतयातादृशमूलंसंगमयतिनतुव्यपव्यतिरेकाभ्यामितिविरोधिप्रामाण्यनिश्चयसत्त्वेप्रामाण्यसंशयोनसं
भवतीत्युक्तेतादृशनिश्चयासत्त्वमनभिधायाऽत्रत्त्वविदिदमित्यादिनाप्रामाण्यसंशयस्यानुभविकत्वप्रादुरुपहृवृत्ताभिधानमसंगतमतआहतादृशग्रहेप्रामा
ण्यनिश्चयानुत्पन्नंस्वरूपकल्पनीयत्वपरतयाऽऽवश्यकत्वानुभवसिद्धत्वेतिनतुव्यवसायस्येत्यादिमूलेगानुव्यवसायस्यविषयांशेनि।र्विकल्पकतावारणान्यथा
नुपपत्त्याव्यवसायोहिस्वेतरप्रकारविशिष्टधर्म्मिविषयकत्वव्यवस्थापनेनतस्यप्रामाण्यावहितत्वोपपादनमयुक्तंआनुभविकप्रामाण्यसंशयानुरोधेनप्रामाण्या
नवगाहित्वोपगमस्यावश्यकतायाःप्रागभिहितत्वादतःप्रयोजनसत्त्वेऽपिसामग्र्याःकार्य्योत्पादकतायाआवश्यकत्वात्संशयानुपपत्तेरपिसामग्रीबलात्प्रा
माण्यभानसद्भावशंकापरतयातन्मूलंसंगमयतिनत्वित्यभिमतंप्रविरोधादितिजानामीत्याकारकताकथनविरोधादित्यर्थःधर्म्मितावच्छेदकांशेप्रामा
ण्यस्यस्वतोग्राह्यतानमतिकारानुमताइदंतुरजतत्ववैशिष्ट्यंधर्म्मितानानुव्यवसायविषयःज्ञानविषयत्वसंबंधेनरजतादिवैशिष्ट्यमस्मात्तदंशेभानोपगमा

नुतरंशेऽनुव्यवसायस्य निर्विकल्पकत्वेतिस्वपंचक्षमाराता दृत्तो धर्म्मिणीसादिमूलं प्रसाध्यांगकदृष्टांतपरत पाप्यावच्छेतत्र प्रामाण्ये जितत्र धर्म्मितावच्छेदकांशे श्र
न एवाहेति प्रसाध्यांगकत्वादेरजतप्रामाण्यस्य स्वतस्त्वेयुक्तिमाहेत्यर्थः वहिर्विशेष्यक इतिमूलेवा स्वप्रकारविशिष्टधर्म्मिविशेष्यकत्वग्रह इत्यर्थः अवसायविशेष्यो
शेवहिः प्रकारवैशिष्ट्यग्रह इति तन्मूलार्थ इत्याशयेन शंकते नचेति उक्तार्थपरत्वाभिप्रायेण समाधत्ते नहीति भ्रमसाधारणत्वान्न उक्ताविदं रजतभिन्नमेदा
वोपेपि रजतत्वविशिष्टधर्म्मिविषयकत्वादित्यर्थः न स्याचालक्षणेष्यकार रजतत्वेति रजतत्वविशिष्टं इदं विशेष्यकं रजतत्वप्रकारकमिदं ज्ञानमितीत्यर्थः प्रामाण्य
ग्रह इति शेषः तथा च रजतादिविशेष्यताघटितं प्रामाण्यं विशेष्यतावत्प्रकारिताभिन्नविषयिताप्रकारिताभिन्नविशेष्यतायां प्रतियोगिज्ञानं विना न भासतेत्व
ज्ञानस्य चानियमान्नोक्तप्रामाण्यस्य स्वतो ग्राह्यत्वमित्याह न चेत्यादिना एतत्प्रकारितान्यत्वे नियमत इति शेषः स्वाजन्येण प्रकारिताज्ञानानासहकस्मिन्वहिर्विष
यक इत्युक्तवा वहिर्विशेष्यक इति यन्मूलं तत्रोक्तं तावतापि विशेष्यतात्वेन विशेष्यतायाः प्रामाण्यघटकता न तदनुमनेति प्रतीयत इत्याह तदुक्तमिति वहिर्वि
शेष्यक इत्यस्य यथाश्रुतार्थे दोषमाहान्यथेति ज्ञानविशेषणतानयेति ज्ञानं विशेषणताविषयिताविशेषणतानयेत्यर्थः अथवा तद्विशिष्टविषयकत्वादिना

श्रीरम·

नघटितसंबंधेन तद्धर्म्मविशिष्टधर्म्मिविषयकत्वादित्यर्थः धर्म्म्यंशे निर्विकल्पकतावारणाय स्वप्रकारकज्ञानविषयत्वसंबंधेन रजतत्वादेर्धर्म्मिविशेषणतया भान
स्यावश्यकत्वादित्यर्थः तावन्मात्रे ज्ञानघटितसंबंधेन रजतत्वविशिष्टविशेष्यकत्वविशिष्टं रजतत्वप्रकारकत्वमित्यर्थः भ्रमसाधारणत्वादिति शुक्ताशेदेरपि ज्ञानघटि
तसंबंधेन रजतत्वविशिष्टत्वात् शुक्त्यादौ समवायेन रजतत्वप्रकारकज्ञानेपि तद्धर्म्मसत्वादित्यर्थः तथा च तादृशधर्म्मज्ञाने स्वतः तावन्मात्रे परतो वेति न विवाद इति भा
वः रजतत्वेति समवायेन रजतत्वविशिष्टेयत्तत्र शुक्तीवर्त्तिनि तद्विशेष्यकं समवायेन रजतत्वप्रकारकं ज्ञानमितीत्यर्थः प्रामाण्यग्रह उक्तविवादविषय इति शेषः नचेतदिति स
मवायेन रजतत्वघटितं प्रामाण्यं नानुव्यवसायग्रहणायोग्यमित्यर्थः स्वातंत्र्येण विशेष्यताद्युपस्थापकज्ञानासहकारेण मनसोग्रहणादिति तज्ज्ञानस्य विशेष्यताद्यंशे
अलौकिकविषयिताशालित्वनियमेन तज्ज्ञानसामग्र्या उपनायकज्ञानघटितत्वादिति भावः चेद्धिर्विशेष्यक इति समवायादिरूपबाह्यसंबंधेन रजतत्वादिविशिष्टधर्म्मि
विशेष्यकत्वग्रह इत्यर्थः केचित्तु तावन्मात्रं न प्रामाण्यमिति रजतत्वविशेष्यकं रजतत्वप्रकारकमिदं ज्ञानमित्याकार एव प्रामाण्यग्रहः प्रवर्त्तक इत्यर्थः भ्रमसाधारणत्वादिति
इदमंशे रजतत्वभ्रमग्रहदशायामपि तादृशग्रहसंभवादित्यर्थः रजतत्वविशिष्टमिदमिति प्रवृत्तिविषयतावच्छेदकरूपविशिष्टधर्म्मिणां तद्वत्त्वेन स्वातंत्र्येणैव ग्राहमानंता

दृश्यरूपविशिष्टविशेष्यकत्वावच्छेदेनतत्प्रकारकत्वावगाहिज्ञानमित्यर्थः बहिर्विशेष्यकइतिबहिरिन्द्रियंतत्रोभयविशेष्यकइत्यर्थइत्याहुः गुरुमतसिद्धत्वतत्ताभावसाधक
मनुमानमाह मूले अनभ्यासेति अनभ्यासदशाविशेषादर्शनदर्शनदशा तदायद्वंउत्पन्नंयज्ज्ञानंतत्प्रामाण्यमित्यर्थः तत्तज्ज्ञानविशेषणाप्रयोजनमालोकदृढदाहसंशय
विषयत्वमिति सर्वत्रेति प्रामाण्यइतिशेषः दुर्लभमिति विशेषदर्शनजन्यज्ञानेप्रामाण्यसंशयाभावात्तत्प्रामाण्यसंशयविषयत्वासत्वादितिभावः इतिभागासिद्धिपरीहारा
येति अत्रतादृशप्रामाण्यसंशयविषयविषयत्वरूपहेतुद्रूप्याभावेनज्ञानंप्रामाण्यत्वमात्रस्यपक्षतावच्छेदकत्वेनइतितादृशप्रामाण्यरूपभागेहेतोर्वसिद्धिःस्यात्तद्वारणा
येत्यर्थः ईश्वरादिज्ञानेतत्प्रामाण्ये अंशतोबाधवारणायेति सायमतेपितत्स्वतस्त्वतोग्रहादितिभावः नचतद्वतितत्प्रकारकत्वरूपप्रामाण्यस्यतत्तत्प्रकारकभेदेनाननुगमात्रेक
रूपेणापक्षतासंभवइतिविशिष्यैवतत्तत्प्रामाण्यस्यपक्षीकरणीयतयानभागासिद्ध्यादिप्रसक्तिरितिवाच्यं ज्ञानव्यक्तिभेदभिन्नत्वात्स्वरूपप्रकारिताघटितघटत्ववद्विशेष्य
कत्वावच्छिन्नघटत्वप्रकारकत्वादीनांनत्वेनानुगतेनपक्षत्वात्तत्प्रामाण्यसंशयाविषयज्ञाननिष्ठतादृशप्रामाण्यव्यक्तौभागासिद्धेरीश्वरादिज्ञाननिष्ठतादृशप्रामाण्यव्यक्तौ
चांशतोबाधस्यावश्यकत्वेः ज्ञानव्यक्तिभेदेनतद्भेदविरहेपिभिन्नैःप्रकारादिभेदभिन्नप्रामाण्यानांप्रमापदप्रवृत्तिनिमित्तत्वेनपक्षत्वमितिविप्रतिपत्त्यनुकूलत्वात् यत्प्रकारघटि

प्रामाण्यस्य क्वापि न संशयस्तत्तादृशपक्षतावच्छेदकाक्रान्ते भागासिद्धेरीश्वरादिज्ञानविषयप्रकारविशेषघटितः प्रामाण्ये च तादृशांशे बाधस्य च सत्त्वेः न च प्रामाण्यमात्रस्यैव सत्तोथात्वं गुरुत्वमनुमतं स्वस्य थास्वनुगतपक्षतावच्छेदकप्रयासवैयर्थ्यात् तन्मते प्रामाण्यसामानाधिकरण्यमात्रेणात तदभावसाधनेनापि निर्वाहादिति तत्र च न भागासिद्धिरंशतो बाधस्य वा दूषणत्वमिति पक्षसंकोचवैयर्थ्यमिति वाच्यं यथा परैः प्रामाण्यमात्रस्य स्वतस्त्वसिद्धिरुद्देश्या तथास्माकमपि संशयविषयतन्मात्रस्यैव परतस्त्वसिद्धिरुद्देश्येति तन्निर्वाहाय पक्षतावच्छेदकावच्छेदेनैव परतस्त्वस्य साधनीयत्वात् भागासिद्ध्यादिवारणाय उक्तविशेषणानां वैशिष्ट्यमात्रस्य कर्तव्यत्वात् अत्र च ज्ञानव्यक्तिभेदेन घटत्ववतीत्वादेः प्रामाण्यस्य भेदविरहे तदाश्रयप्रामाण्यानुमित्यादिग्राह्यत्वस्य तत्र सत्त्वेन विशिष्टसाधने सिद्धसाधनमभावसाधने बाध इति साध्यघटकस्याश्रये यावत्त्वं निवेशनीयं तथा च स्वपदेन प्रमापदप्रवृत्तिनिमित्तसामान्यविवक्षणेन तदाश्रययावदग्राह्यत्वस्याप्रमतो प्रसिद्ध्या साध्याप्रसिद्धिः विशिष्टघटत्ववतीत्वादिना विवक्षणे विधेयावच्छेदकावच्छेदेन साधने घटत्ववतीत्वादावंशतो बाधः सामानाधिकरण्यमात्रेणात तत्साधने अनुगतपक्षतावच्छेदकप्रयासवैयर्थ्यम् एकप्रामाण्यस्यापरप्रामाण्याश्रययावदग्राह्यत्वाभावात् एवं च न अनुगमेन नैयायिकानामप्यनुगतरूपावच्छेदेन तत्तत्प्रामाण्याश्रययावदग्राह्यत्वाभावसाधनमफलमिति घटत्ववनिष्ठघटत्वप्रकारकत्वादिनैव पक्षतायाः स्वीकार्यतया उक्तविशेषणानामव्या

वर्त्तकंपदिवस्वाद्याहकयकिंचित्तस्वाश्रयकंपयन्तत्र्द्रेदकूटात्मकमनुगतंस्वतत्त्वंविवक्ष्यतेनतदान्यायमतेतादृशभेदसमुदायवत्त्वमीश्वरज्ञानादिमात्रवृत्तिधर्म्मस्येवनतु
घटत्वादेरितिप्रामाण्यघटकघटत्वादौव्यभिचारवारणायोपात्तंस्वाश्रयइत्यादेर्हेतुविशेषणत्वस्यैवप्रयोजनंनचेश्वरज्ञानादिमात्रवृत्तिधर्म्मेव्यभिचारवारकतयैवनतत्सार्थक्यं
सत्त्वानुगमाद्धेतुस्थस्वपदेनपक्षीकृतप्रामाण्यस्यैवोपादेयतयाप्रामाण्याश्रयास्मदादिज्ञानानन्तर्गततीपक्षस्यास्मदादिसंशयविषयतायास्तादृशधर्म्मसत्त्वेनतत्र
व्यभिचारस्योक्तविशेषणदानेपिदुर्वारत्वात्एवंघटत्ववतीत्यादेर्ज्ञानव्यक्तिभेदेनभेदमतेएवज्ञानव्यक्तिनिष्ठपक्षतत्सत्तादृशप्रामाण्याश्रयत्वस्यासिद्धसाधनवाधावि
त्तिविशिष्टतत्तद्व्यक्तिप्रामाण्येतत्तद्व्यक्तिग्राह्यत्वतदभावावेवसाधनीयावितिविशेषणानर्थक्यंनचघटत्वादिमतितत्प्रकारकत्वत्वावच्छेदेनाधेयत्वविषयत्वोभयसंबं
धेनज्ञानवत्त्वंतदवच्छिन्नभिन्नत्वंचसाध्यंतत्रसंशयाविषयतातादृशप्रामाण्यपक्षकेश्वरादिज्ञाननिष्ठतादृशव्यक्तौभागासिद्धिवाधवारणायविशेषणमावश्यकमितिवा
च्यंएवंसतिघटादिज्ञानानंतरंसंशयविषयेगुणत्वादौउक्तोभयसंबंधेनज्ञानवृत्तित्वाभिधानाप्रसंगात्इत्यालोच्यदीधितिकृताअनभ्यासेत्यादिकंहेतोःस्वरूपासिद्धिप्र
दर्शनमात्रफलकमित्युक्तंनानाप्रामाण्यानामननुगतरूपेणपक्षत्वेउक्तविशेषणेनापिनभागासिद्धिपरीहारइत्याशंकतेनन्वितिअनभ्यासदशादावपिनसर्वत्रसंशयाद्

मा ३

तिअनभ्यासदशापन्नज्ञानदृष्टान्तेऽपि सकलप्रामाण्येन संशयविषयत्वमित्यर्थः अनभ्यासदशायां त्रिसकलज्ञानेन प्रामाण्यसंशय इति तु नार्थः ज्ञानव्यक्तिभेदेन प्रामा
ण्यभेदविरहे स्वाश्रयतादृशसकलज्ञाने प्रामाण्यस्य संशयविरहेऽपि स्वाश्रययत्किंचित्तादृशज्ञानधर्मिकसंशयकोटित्वस्य तत्तत्प्रामाण्येऽनपवादात् भागासिद्धिताद
वस्थ्यमिति यादृशप्रकारविशेषादिघटितं प्रामाण्ये ज्ञानव्यक्तिभेदेन प्रामाण्यभेदे यादृशघटादिज्ञानव्यक्तिवृत्तिप्रामाण्यस्य ज्ञाने वा न संशयः कदापि यथाश्रुतपक्षतावच्छेदका
क्रान्ते तत्त्वहितत्वमतादिति भावः अनेन अनभ्यासदशापन्नेनेत्यनेन उपलक्षणतां लक्षणतया विवक्षितं तथा च तत्तादृशप्रामाण्यपदेन स्वसामानाधिकरण्यं न तु ज्ञानपदेनेति
भावः प्रामाण्यपदस्यैव संशयविषयप्रामाण्यरूपविशेषपरत्वं न त्वाहकमेव ज्ञानविशेषणमापन्ना—मित्यर्थः क्रमानरणीयः ज्ञानप्रामाण्यपदद्वैयर्थ्यापादनादित्यग्रिम
फक्किकाविरोधात् ननु हेतुघटकस्य संशयविषयत्वस्य पक्षतावच्छेदकत्वे हेतुसाध्यसहचारग्रहे दोषश्चानुमेयस्य पक्षतावच्छेदकसाध्यसामानाधिकरण्यस्यावगमान्नादनु
मानानुमानानुपपत्तिरित्यत आह प्रामाण्यत्वविशेषितस्येति प्रामाण्यत्वसहितस्येत्यर्थः हेतुपक्षतावच्छेदकाभेदेऽपि हेतोर्न तद्घटकस्य वा पक्षतावच्छेदकतापर्याप्त्यधिकरणो
न सहाभेदनिबंधनस्य सहचारग्रहे अनुमेययावदवगाहित्वस्य नावकाशः प्रामाण्यस्य हेतुघटकतया तत्सहितसंशयविषयत्वरूपपक्षतावच्छेदकवति साध्यवत्तापाः

सहचारग्रहेणानवगाहनादित्यर्थः प्रामाण्यसंशयेति प्रामाण्यसंशयाहितस्य चतुर्थीदिङ्गाज्ञातसंशयस्यैव विषये प्रामाण्ये साध्यो तत्र तृतीयस्य गुणत्वेनेन प्रामाण्यसंश
याजन्यस्यैव संशयस्य विषये तादृशसंशयविषये प्रामाण्यविशेष इति यावत् एवमपि संशयविषयप्रामाण्यत्वस्य पक्षतावच्छेदकत्वेपि हेतोर्मिलोक्तसमुदितहेतुना
वच्छेदकावच्छिन्न-पस्य अन्यतरोपलक्षणं तत्तद्धेतुतावच्छेदकरूपेणासंबंधबोधकं एकतरहेतुमन्यतेपरत्वे अनुमानयोर्विपरीतक्रमेणाहेतुद्वयपक्षपक्षतावच्छेदकत्वो
क्तिविरोधेन यथाश्रुतासंगतिर्बोध्या इत्यत आह तस्यापि हेतोः पक्षतावच्छेदकत्वेनोपन्यासोऽसांप्रदायिक इतिमन्तानः प्रकृतहेत्वोः पक्षतावच्छेदकत्वंपरिसततिहेतुक
तानस्येति प्रकृतानुमानहेतुभिन्नस्य उक्तद्वयान्यतरस्येत्यर्थः पक्षतावच्छेदकत्वान्तहेतुकानुमाने पक्षतावच्छेदकत्वोपगमात् न सिद्धसाधनं न पक्षतावच्छेदकैकदेशसंशय
विशेषविषयत्वविशिष्टे साध्यसिद्धेरवकाशः अव्यवहितपूर्वक्षणे साध्ये सति प्रामाण्यसंशयविनाशः संशयतद्विषयत्वं द्वितीयहेत्वर्थ इत्याशयेनेदं तत्तु प्रामाण्यसंशयज
न्यसंशयाविषयत्वरूपस्य आरोपेऽपि तद्धर्मिज्ञायेनानस्य प्रथमहेतुरन्येपि हेतोर्भागासिद्ध्यपरीहारात् तत्साध्यवद्भिन्ने इत्यस्य ज्ञानादिमात्रवृत्तिप्रामाण्येपि हेतोर्भागबाधापरीहा
रात् एवं सति मूलोक्तहेतोरेकमत्वेऽपरस्यावश्यकतयाप्यसत्त्वे च साध्यवत्साप्यावश्यकतया प्रामाण्यभिन्ने भागासिद्धिबाधयोस्तदेकतरमात्रपक्षतावच्छेदकत्वेप्यन

वकाशात् ज्ञानप्रामाण्यत्वनिवेशनमफलं प्रकृतहेतोः पक्षतानवच्छेदकतयासिद्धसाधनवारकताया अन्ययोमादिसाध्येन दूषयति ज्ञानप्रामाण्यपदेति ज्ञानप्रामाण्य
त्वं पक्षतावच्छेदकेन निर्वक्तव्यमत एवेति शंकानिराकरणाय पपदपर्य्यन्तानुसरणं हेतुघटितसाध्यविनपक्षतावच्छेदकत्वमिस निराकृतसैद्धेतुकृमान्यस्य पक्षतावच्छेदकत्वमा
द्रसैवचसमाधत्ते मैवमिति अव्यावर्त्तकस्यापीति भागासिद्ध्याएकानुमानदोषावारकस्यापीत्यर्थः ननु आत्मव्यावर्त्तेवहितस्यैत्यर्थः प्रामाण्यत्वस्य प्रामाण्यभिन्नहेतुम
दप्रामाण्यादिव्यावर्त्तकत्वात् ईश्वरानुमान इति जन्यत्वस्य जन्यं जन्यसकर्तृकं कार्य्यत्वादित्यनुमान इत्यर्थः जातिविशेषणेनेति कृतिविशेषणार्थकेत्यर्थः जन्यपदस्ये
ति अस्मन्मते जन्यमात्रस्यैव ईश्वरकृतिजन्यतया अप्रसिद्धिवारकत्वेपि प्रतिवादिमीमांसकमते निराकृतत्वप्रसिद्ध्या जन्यत्वस्य व्याहत्यभावाद्दोषावारकत्वेपि पथासार्थकं दू
षकवैयर्थ्यमुन्यत्वं हेत्वादिविशेषणवैयर्थ्यस्य दोषत्वात् तत्तद्दस्यापितयातादित्यर्थः तद्घटितधर्म्मावच्छिन्ने साध्यसिद्धेरनपेक्षितत्वेन तन्निवेशोऽर्थं निरर्थसंजयेदिसा
शंकामपनेतुमुक्तम् अपरंजकतयेति प्रामाण्यत्वस्य विप्रतिपत्तिजसंशयधर्म्मितावच्छेदकत्वेन साध्यसिद्धौ पक्षांशे प्रकारतायाश्चावश्यकतयेत्यर्थः सिद्धसाधनवारकत
यापि तत्सदं सार्थकयति वक्तत इति पक्षतावच्छेदकेपीति साध्यानिरूप्यविषयतदविषयपक्षद्वयसाधारणैकरूपस्य पक्षतावच्छेदकत्वेपीत्यर्थः अपिकारेणानथास

तिपक्षतावच्छेदकसामानाधिकरण्यमात्रेणैकधर्म्मिणि सिद्धिसत्वेपि नवीनमते पक्षतावच्छेदकव्यापकतामविकं साध्यांशोऽन्वयावगाहनानुमितिर्न्नोत्पद्यत इति अंशतः सि
द्धसाधनदोषोद्धारसंभवः अनित्ये वाऽमनसे इत्यादिस्थल एव पक्षतावच्छेदकभेदेन पक्षपेसम्प्रदायालंबनानुमितेरेवोपगंतव्यतया एकांशे साध्यसिद्धेर्विरोधितेति सूचितं अं
शतः सिद्धसाधनमिति दोष इति शेषः व्यापकतायाः संसर्गतया भानस्याप्रामाणिकत्वेन प्राचीनैरनभ्युपगमादिति भावः न चैतन्मते पक्षतावच्छेदकैक्यभागासिद्धेः कापि
दूषकता न स्यात् सामानाधिकरण्यमात्रेण साध्यानुमाने तत्स्यान्न दोषता तदवच्छेदकावच्छेदेनानुमितेश्चैतैरनभ्युपगमादिति वाच्यं पक्षतावच्छेदकाक्रांतसकलव्य
क्तिषु अनुमितिरेव तन्मते अवच्छेदकावच्छेदेनानुमितिः तादृशानुमितौ च तादृशसकलव्यक्तिषु हेतुमत्ताज्ञानं हेतुः अनुमितौ समानविशेष्यकपरामर्शस्य हेतुत्वात् तद्वि
रोधितया च एकदेशे हेतुसिद्धेर्दोषत्वं दुर्वारं धर्म्मितावच्छेदकसामानाधिकरण्यमात्रावगाहिन्यामपि बुद्धौ तथा विधविपरीतबुद्धेः समानविषयायाः प्रतिबंधकत्वसंभवा
द्वामत्वमतत्वात् अत एव व्याप्तिनिश्चयविषयप्रसिद्धधूमे व्यभिचारसंशयासंभवेन धूमांतर एव तत्संशयस्य स्वीकरणीयतया तदभावार्थं सामान्यप्रत्यासत्तिस्तैराद्रिय
ते इति अप्रामाण्यावर्ज्जनमिति अन्यथा उक्तहेतुमति तत्र सत्तोग्राह्यत्वाभावस्योभयप्रसिद्धतया तदंशे सिद्धसाधनं स्यादिति भावः सहेतुरुक्तः तस्यानभ्यासे सादिप्रदसा

र्थद्वयपरतायामवितुष्टः कल्पांतरमाह अनभ्यासेति संशयसामग्री तृतीयक्षणावृत्तिसंशयविषयताप्रयोजकतदव्यवहितपूर्वकालीनविपरीतकोट्युपस्थितिविशेषादर्शन
साधारणधर्मज्ञानादिसहितोपस्थितिविषयत्वं तद्वृत्तिप्रामाण्ये च तृतीयक्षणेऽवश्यसंशयोदयात्तत्र क्वचिदपि हेत्वसिद्धिरिति भावः एतत्कालेपि ज्ञानप्रामाण्यग्रहे वैयर्थ्यादो
षपरीहारः पूर्ववत् यत्तु संशयसामग्रीपदं प्रामाण्यसंशयाघटितसंशयसामग्रीपरं तृतीयक्षणावृत्तिसंशयपर्यंतमविवक्षितं एवं च प्रामाण्यघटकार्थे व्यवसायनाशोत्तरं तादृशसं
शयविषयेंऽशे बाधासिद्ध्योर्वारणाय ज्ञानप्रामाण्यपदमिति तन्न तथा सति तादृशप्रामाण्ये स्वाश्रयानंतरतृतीयक्षणे न संशयः अपि तु तदुत्तरमेव प्रामाण्यसंशयं विना संश
यस्तत्र भागासिद्धेर्दुर्वारत्वात् प्रथमसाध्यस्य विप्रत्ववर्तित्वपरसाध्याभावरूपतया व्याख्यातकल्पेन प्राद्वितीयसाध्यं न्यावच्छेदकस्वाश्रयेतीति स्वाश्रयग्राह्यतामतेऽपि स्वाश्रयातिरि
क्तानुमित्सादिग्राह्यतया सिद्धसाधनमतो मात्रपदं दत्तं तथा च स्वाश्रयग्राह्यत्वे सति स्वाश्रयातिरिक्ताग्राह्यत्वरूपं परतस्त्वं फलितं साध्यं ज्ञानव्यक्तिभेदेन घटत्ववतीत्यादेरभे
देनस्य तदाश्रयेऽप्रादिज्ञानयथात्वेन भाबाधवारणाय सत्त्वांतार्थघटकस्वाश्रयेणावत्वविशेषणं देयं प्रामाण्यं च मरूपज्ञानद्वयांतर्गतस्वप्रकाशव्यवसायापाश्चात्यतया सिद्धसा
धनवारणाय स्वाग्रहीतासंसर्गकप्रामाण्योपस्थित्यसमवहितत्वमपि तत्र निवेश्यं स्वाश्रयातिरिक्तेत्यत्र स्वपदेन मुख्यविशेष्यताघटितमेव प्रामाण्यं विवक्षितं अन्यथा तद्वति

अ·सि·दी·ग·
८३

तत्प्रकारकत्वग्रहकालानुमित्यादेस्तद्वृत्तितत्प्रकारकत्वनियमेन तदाश्रयातिरिक्तत्वासंभवाद्बाधापत्तेः स्वपदस्य समभिव्याहृतवाचकतापर्याप्तस्य साध्यत्वं प्रतिपादनीयं तदा तदेव स्वाश्रयेण स्वपदेनोपादेयमिति पक्षं निराकृत्य सर्वदा स्वपदेन पक्षीकृततत्प्रामाण्यमेवोपादीयते तस्य समभिव्याहृतावाचकत्वेप्यगत्या तत्तद्बोधार्थं लक्षणाया एवोपगन्तव्यत्वात् इदं पक्षमात्राविषयत निराकरणपक्षमप्रामाण्यपरं पदद्वयं तत्सत्त्वेपि साध्यसत्त्वं प्रदर्शयन्नापातः संगमयति अत्र तत्पदापीति अप्रामाण्येपीति घटत्ववति घटत्वप्रकारकत्वाभावेत्यर्थः तदाश्रयेति पटत्वादिप्रकारकज्ञानरूपयावत्तदाश्रयेत्यर्थः न तु यावत्तदाश्रयेत्यर्थः न तु यावत्तदाश्रयमध्ये निर्विषयकस्याप्यन्तर्भावान्नदर्शात्त्वासिद्ध्यामाध्याप्रसिद्धिरेव स्वाश्रयपंज्ञानत्वनिवेशेपि न्यायमते साध्याप्रसिद्धिर्दुर्वारैवेति वाच्यं स्वाग्राहकयत्किंचित्स्वाश्रयपकत्वस्यैव फलितसाध्यतया साध्याप्रसिद्धिविरहात् यत्तु तदभाववत्ति तत्प्रकारकत्वरूपमप्रामाण्यमित्यादौ प्रसिद्धं दूषणं तः यावत्तदाश्रयप्रमात्वं तद्घटकप्रकारकत्वं च प्रसिद्धं तदभाववत्त्वं च सुलभमिति तत्र यथाश्रुतसाध्यादरे स्वपदेन प्रमात्वाभावमादाय साध्यप्रसिद्ध्यसंभवं न तत्र निर्विषयप्रवृत्तिधर्मान्तरे च तादृशधीसाध्यव्यभिचारस्य दुर्वारत्वात् न च यावत्स्वाश्रययाथार्थ्यं यत् स्वं ईश्वरज्ञानादिमात्रवृत्तिधर्मस्तद्भिन्नत्वस्य साध्यत्वे न कुत्रापि व्यभिचारः उभयविधाप्रामाण्यस्यैव दृष्टान्ततासंभवश्चेति वाच्यं न स्वाश्रययाथार्थ्यमित्यादौ स्वपदस्य प्रतियोगिरूपसमभिव्याहृततत्परत्वे अप्रामा

श्रीराम
८३

णपदृष्टं नेत साश्रयग्राह्यत्वरूपसाध्यसंभवेनेस स्यासंगतापत्तेः तत्र तत्पदस्य भेदात्तु योगिप्रत्यक्षं ताप्रामाण्यपरामर्षकत्वात् अनुमत्तं तु सुचितम् इति सूत्रस्य विरोधाये सा
दित्यर्थ इति प्रकृतप्रामाण्यघटकपदस्य घटत्वादिरूपप्रकारकत्व इत्यर्थः साध्यसंभवेन साध्याह कथंकिंचित् साश्रयकत्वरूपफलितसाध्यसत्वेन यथाश्रुतसाध्यसत्वं तु घट
त्वाश्रयविषयत्वरूपं तदग्राह्यत्वात्प्रसिद्ध्या न संभवतीत्युक्तफलितसाध्यादवस्य प्रमात्वाभावादौ साध्यसत्वनिर्वाहायावश्यकः विशेषणतो निक्षणाद्विशेषणात्तृतीयेत्यर्थः याव
त्साश्रयप्रत्यक्षं ईश्वरज्ञानमात्रनिष्ठधर्मेति तद्विकल्पाक्षगोचरपुरुषांतरीयसंशयविषये व्यभिचारवारणाय संशये साश्रयसामानाधिकरण्यस्य योगिज्ञानमात्रवृत्ति
धर्मेयोगसर्वकालीनतज्ज्ञानसमानाधिकरणसंशयविषये व्यभिचारवारणाय साश्रयाधिकरणगोचरत्वस्य संशयविशेषणत्वमावश्यकमेवेति ध्येयं साश्रयग्रा
ह्यत्वं साश्रयजन्यग्रहविषयत्वमित्यभिमाने विशेषणव्यावृत्तिमाह प्रमाणानितीति प्रत्यनुमितिप्रामाण्यसंशयाहितसंशयेति अयं प्रमाणानिसत्तु मितिधर्मिकप्रमा
त्ववद्विशेष्यकप्रमाप्रकारकत्वरूपप्रमात्वसंशयजन्यतादृशानुमितिचतुर्थादिक्षणोत्पन्नप्रमाकोटिकसंशयेत्यर्थः एतादृशसंशयविषयत्वकथनेन प्रमायां व्यभिचा
रसंपादकहेतुमत्त्वं दर्शितं एतच्च हेतुस्थस्वपदस्य पक्षीकृतप्रामाण्यपरत्वमेवेत्याशयेन स्वपदद्वयस्य समभिव्याहृतैकार्थपरत्वे प्रमाश्रयासमानाधिकरणप्रति

प्र॰मि॰टी॰ग॰
८५

ग्राहेतुमतानिर्वाहात्साश्रयात्मग्राह्यतया साश्रयात्मजन्यग्रहविषयतया स्वरूपसंबंधेन साश्रयनिवेशस्यावश्यकत्वे च प्रमायाः स्वरूपसंबंधेनाश्रयेनान्वेतियथा
श्रुतासंगतेः प्रमापदं प्रमाश्रयत्वपरं बोध्यं प्रकृते प्रामाण्यपरत्वप्रकृतपक्षे सिद्धसाधनापत्ते विशुद्धमते विप्रामाण्यपरस्य यावद्भिः साश्रयपदेवग्रहात्तु तज्जन्यज्ञानेनेति
भावः प्रघपिघटवदिदं घटत्वप्रकारकज्ञानं प्रमेत्यादिसमूहालंबनरूपप्रामाण्यानुमितौ विशेषणतावच्छेदकप्रकारकज्ञानविधया भावतां घटत्वादिप्रकारकयव
सायानां स्वरूपयोग्यतया तादृशानुमितित्वाद्यतत्प्रामाण्येऽभावसाध्यस्यबाधः स्यादिति फलोपहितत्वं तज्जन्यत्वे विशेषणीयं तथा च यावतां तादृशव्यवसायानां क
चिदपि ज्ञाने फलोपधायकत्वं नास्तीति यावत्साश्रयजन्यज्ञानतद्घटितसाध्यमप्रसिद्धमिति यथाश्रुते न सिद्धसाधनसंभवः साश्रयजन्यग्रहे यावत्त्वविशेषणे च
मादृशयावद्ग्रहविषयत्वस्य गुरुमते ज्ञानत्वादेरप्रसिद्धस्य घटत्वादिहेतुकद्रव्यत्वाद्यनुमितौ साध्यविषयतया भावस्य घटत्ववतीत्यादेः सत्त्वे न सिद्धसाधनसंगतावपि प्र
मायां व्यभिचारवारकत्वं विशेषणस्य न संगच्छते कस्या अपि प्रमायाः साश्रयाजन्ययावज्ज्ञानविषयतासत्त्वेन साध्यवत्ताक्षतेः तथापि तादृशरीत्या साश्रयाप्रसिद्धेर्वारणाय स्व
विषयकज्ञानानुपधायकयत्किंचित्साश्रयकत्वं साध्यमादरणीयमित्याशयेन तदस्तुधावत्तं एतादृशसाध्ये स्वरवदो व्यभिचारोऽपि बोध्यः तत्र घटत्ववतीत्यादिप्रामाण्यपाश्र

श्रीराम
८५

वाव्यवहितोत्तरसंशयविषयतासत्त्वात् यावत्तदाश्रयाणां सन्निकर्षघटकतया विषयतया च तत्तत्साक्षात्काराजनकतया साध्यसत्त्वाच्च साश्रयविषयत्वमर्थ इतिग्रहधातो
विषयितार्थकत्वात् अन्यतरत्वनिरूपकरूपधर्म्यार्थकत्वादिति भावः तदसत्तीति साश्रयात्मविषयत्वं संभवतीत्यर्थः तथा च घटत्वादावर्थगतत्वतापि परत्वस्वरूपसाध्यसत्त्वात्
तृतीयेति विशेषणवैयर्थ्यं दुर्वारमेवेति भावः नन्वात्मनोपि व्यापारानुबंधि विषयत्वं प्रमारूपार्थे नास्तीत्यत आह प्रतिपत्त्यनुबंधिविषयत्वं तन्निरूपितविषयत्वं व्यापारानुबं
धिता च तज्जन्यनिरूपितविषयत्वं तन्निरूपितविषयत्वं तन्निरूपितत्वजन्यनिरूपितत्वयोरननुगमेन तादृशविषयत्वयोरननुगमादित्यर्थः तथा च व्यापारानुबंध्यात्मविषयताया
तत्साध्यघटकत्वे निर्व्यभिचारकारणता इति भावः सकलस्यः स्वपदस्य समभिव्याहृतार्थपरत्वकल्प्यः इदं तु बोध्यं एतत्तत्क्षणे चैत्रस्य कुतश्चित् शब्दादेतत्क्षणोत्पन्नचैत्रज्ञानत्वप्र
कारकं यज्ज्ञानं जातं तत्स्वस्वमेव विषयः अन्यस्य तादृशस्याभावात् तथा चातादृशचैत्रज्ञानत्ववतीसादेः प्रामाण्यस्याश्रये तस्मिन् ज्ञाने तादृशप्रामाण्यसंशयाहितस्य संशय
स्य विषये तादृशचैत्रज्ञानत्वरूपेऽर्थे साश्रयतादृशज्ञानग्राह्ये व्यभिचारकतया हेतुविशेषणसार्थक्यं भवत्येवमनुगतसाध्यस्य पक्षदृष्टांतसाधारण्यानुबोधेन परं स्वपदस्य प
क्षीकृतप्रामाण्यपरतापक्षीकृतप्रामाण्यस्य विशेष्यस्वपदेनोपादाने प्रामाण्यभेदेन साध्यभेदोऽगत्या इष्यात एव समूहालंबनरूपाया एव सकलप्रामाण्यपक्षकानुमितेरूपं

नव्यत्वात्प्रमापदप्रवृत्तिनिमित्तत्वेनसकलप्रमासाधारणपक्षत्वेपिप्रामाण्यमपिननिर्भरइतिवक्तुंततःप्रथमकल्पेनभागासिद्धिपरिहारायपक्षविशेषणमित्यादितदूष्यस्वरसादरणी
पतेनदेशानुगतंपक्षतावच्छेदकंसाध्याप्रवृत्तित्वोभयसंबंधेनाप्रयविशिष्टत्वंसर्वप्रमासाधारणानुगतंसाध्यंस्वरूपवृत्तित्वप्रमाणवृत्तिनिष्ठप्रवृत्तितत्वकोटित्वोभयसंबंधेनसंशयवि
शिष्टत्वमनुगतंहेतुरितिस्वतंत्राःप्रथमहेतुमाख्यातुमुपक्रमतेसाध्ययेतीतिसंशयपक्षमयेइत्यादिमतीत्यत्रशतृप्रत्ययेनवर्त्तमानत्वविवक्षणेवर्त्तमानार्थककृदंतसमभिव्या
हारस्थलेपक्षत्वभावेनसादिस्वत्वानुविशिष्टसमस्यासमानकालीनत्वबोधनात्साध्यपसत्वसमानकालीनत्वंसंशयेलभ्यतेतथाचसंसाध्योपपत्तास्मात्साध्यप्रयोगेत्रतृतीयपक्षता
जातप्रमाणसंशयपक्षणोप्याप्रपासत्वेनतत्सत्वसाध्यपसत्वासमानकालीनत्वादतःमतीत्यस्यज्ञानइत्यर्थकत्वमुपेयमित्यर्थःअत्रजलेवापुक्षणासंबंधोनार्थःअपितुमूलस्था
नधात्वंलक्षणासंबंधएवअत्रसधात्वर्थपविसागेवीजाभावात्नमुत्वंहेत्नेतसदस्यजन्मक्षणस्थितिक्षणसाधारणतदधिकरणार्थकतयाव्याख्येयतयाद्वितीयक्षणसाप्रकांतरोत्रहि
रोधाच्चवर्त्तमानसामिप्येवर्त्तमानार्थकप्रत्ययइत्याशयेनशतृप्रत्ययस्यैवभूतार्थत्वमाहतंनवासधातुनासाध्यपक्षणासंबंधेरोपितेतदुत्तरेत्यतःसाध्यपक्षणोत्तरत्वंदुर्लभपदा
र्थैकदेशक्षणस्यतच्छब्देनपरामर्षयोग्यंप्रज्ञावतीयपदार्थैकदेशस्यभानात्तुतच्छब्देनापरामर्षइत्यभिप्रेत्यैकैरभिधानादितिवाच्यंक्षणानिष्टसाध्यपसंबंधस्यक्षणस्वरूपतयातत्क्षणो

न्तरत्वपर्य्यवसानेनतथाव्याख्येयत्वात् एवंचसाश्रयसप्तमीत्यस्यपूर्वंसाश्रयेसप्तमीत्यर्थः एतस्यचहेतौननिवेशः वैयर्थ्यात् साश्रयस्यप्रामाण्यावगाहित्वेप्रतिबंधकत्वनिश्चयस्य
प्राक्तमतेनतृतीयक्षणेसंशयेनस्मादितितर्कप्रदर्शनायैवतत्त्वकीर्त्तनमिति वक्ष्यमाणमतांतरंनतर्भावेनहेत्वर्थमाह तेनेतितत्तद्वत्तादृशसंशयविषयत्वरूपलिंगंचउभयमतसा
धारणंन्यायमतेगुरुमतेचप्रामाण्यग्रहः न्यायमतसाधारणमुपपादयति ज्ञानस्येतिस्मरणद्वयस्यापीत्यर्थः उत्पन्नेतिद्वितीयक्षणावृत्तेरित्यर्थः एतज्ज्ञानंतुपरोक्षेजन्मोत्तरक्षणास
स्तानाधिकरणत्वेहेतुः तृतीयक्षणइत्यंतंसंशयजननमादित्यप्रथमेणान्वितंजन्मावधिकेति एतच्चतृतीयक्षणेपिबोध्यं धर्म्मिज्ञानानंतकोटिस्मृत्यंतरोद्बुद्धः धर्म्मिज्ञानेज्ञानरूपप्रा
माण्यसंशयधर्म्मिणोऽनुव्यवसायरूपज्ञानेऽनुभवरूपव्यवसायानुव्यवसाययोर्जायमानयोः स्मरणजन्मासंभवादनुव्यवसायानंतरंकोटिस्मृत्यादेः अतएवानुव्यवसायग्रा
ह्यज्ञानमतेजन्माधिकतृतीयक्षणेनसंशयः गुरुमतेव्यवसायधर्म्मिणएवतज्ज्ञानतयाजन्मावधिकतृतीयक्षणेपिप्रामाण्यसंशयसंभवइत्याह तन्मतइति तृतीयक्षणएवेति
संशयजननादिसत्त्वयोर्धर्म्मिधीकोटिस्मृतिभ्यामितिक्रमिकाभ्यामितिशेषः स्वाश्रयाधिकरणक्षणोत्तरतृतीयत्वंचस्वाश्रयाधिकरणसमयध्वंसेनत्वेसतितत्स्वाश्रयाधिकरण
समयध्वंसवत्समयध्वंसवदन्यत्वंनतत्स्वाश्रयध्वंसवत्समयध्वंसवदन्यत्वंवाएतादृशस्यस्वाश्रयजन्यद्वितीयक्षणसाधारण्येपिनक्षतिःतदानीमप्ययथार्थसंशयानुत्पत्त्याव्यभिचा

णानवकाशात्सामानाधिकरण्यमपि संशये विशेषणांशेऽन्यथा व्यधिकरणसंशयध्वंसतद्स्य त्वंवपि तादृं मादायार्थव्यभिचारस्य दुर्वारत्वात् विशेषप्रदर्शनार्थः उक्ततर्कस्य
चक्रः यद्यपि साध्यपस्याप्रामाण्यनिश्चयरूपत्वेपि तत्र स्थितिक्षणावच्छिन्नतृतीयक्षणोत तत्संशयो नानुपपन्नः पूर्वक्षणे प्रतिबंधकविनाशादित्यप्रयोजकत्वं दुर्वारं तथापि निश्चय
नेष्टेपि तस्मिन्नप्रामाण्येऽगृहीते क्षणैकद्वयमध्ये संशयोऽनुभवविरुद्धः तद्दशाणामपि कथंचित्संभवतीत्यभिमानः एतेनेति साध्ययोस्तन्नि चतुर्थक्षणासाधारणात् तृतीयत्वनिवे
शेनेत्यर्थः स्वाश्रयपदस्य स्वाश्रयनिश्चयपरत्वेति योजना स्वाश्रयनिश्चयः स्वाश्रयानुव्यवसायः न तु स्वाश्रयविषयकनिश्चयसामान्यं तथा सति परमते स्वाश्रयस्यैव स्वाश्रयनिश्चयत्वे
न तदप्रसिद्धिकथनासंगतेः न चाप्रसिद्धिवारणाय स्वाश्रयविषयकनिश्चयसामान्यमेव निवेशनीयमिति वाच्यं तथा सति अर्थनिश्चयानात्मकव्यवसायविषयकानुमित्यादि
तृतीयक्षणवृत्तिसंशयविषयेऽर्थव्यभिचारस्य दुर्वारत्वात् यथाश्रुते स्वाश्रयपदस्य यथाश्रुतार्थकत्वे स्वमतेऽसिद्धिः तत्समयध्वंसवत्समयध्वंसवत्तसमयध्वंसवदन्यत्वघटित
तृतीयत्वगर्भहेतोः प्रामाण्येऽसिद्धिः स्वाश्रयेति उक्तरीत्या तादिचतुर्थक्षणोवचतुर्थक्षण एव यद्यपि यत्र स्मरणादिरूपः सघट इत्यादिव्यवसाय एव तद्विशेष्यकघटत्वादिप्रकार
कज्ञानत्वादिधर्म्मितावच्छेदकप्रकारेण धर्म्मिविषयकसमूहालंबनरूपस्तत्र द्वितीयक्षणजातप्रामाण्याप्रामाण्यकोटिद्वयास्मरणसहितात्ततस्तृतीयक्षणेपि प्रामाण्यसं

शयः संभवति तथा तद्धर्म्मघटितप्रामाण्ये नेत्याह द्वशरीसात्तृतीयक्षणे संशयस्तस्यापि परतस्त्वसाधारणानुरोधेन जन्मक्षणावच्छिन्नचतुर्थक्षणमसाधारणात्तृतीयत्वनिवेशश्चावश्य इत्याशयः वस्तुतः प्रतिबंधकस्य यामसत्वेन निश्चयचतुर्थक्षणोत्संशयस्य दुर्वारत्वयात्तदानीं संशयानुत्पादानुभवस्य सविवादत्वात्प्रागसत्वानुसरणे गौरवात् व्यवसायस्य प्रामाण्यपत्तिग्रग्रहरूपत्वेपि प्रामाण्ये हेतुभूतसंशयत्वेनानुपपन्नमित्यस्य प्रयोजकत्वं दुर्वारं चतुर्थक्षणोत्पन्नार्थसंशयस्याप्येवं संभवेनार्थव्यभिचारेपि वक्तव्यत्वे प्राप्तिरिति चतुर्थक्षणावृत्तं स्वाश्रयनाशाधिकरणसमयध्वंसवदन्यत्वरूपतत्स्वव्यवधानमेव तृतीयत्वं निवेश्यं उक्तरीत्यैव प्रामाण्ये स्वमते हेतुसिद्धिः उक्तं च प्रामाण्यपक्षीकरणीयं प्रमापदस्य वहन्निनिभिन्नत्वेन प्रामाण्यपक्षताया उचितत्वात् विशिष्यैव तेषां पक्षत्वात् न च तथापि पक्षप्रामाण्याप्रामाण्योपस्थितिर्द्वितीयक्षणोत्पन्नोक्तसमूहालंबनात्मकव्यवसायद्वितीयक्षणे प्रामाण्यसंशयस्तत्र तृतीयक्षणेऽर्थसंशयसंभवेनार्थव्यभिचारो दुर्वारः प्रामाण्यसंशयस्यैव प्रमात्वघटकघटत्वाभाववादिरूपकोटिद्वयोपस्थितिरूपत्वादिति वाच्यं तत्र प्रामाण्यज्ञानानास्कंदितनिश्चयात्मकस्वीयायाव्यवधानस्यैव निवेशनीयत्वात् एवं च गुरुमते व्यवसायतृतीयक्षणजातप्रामाण्यसंशयादितिचतुर्थक्षणादूर्ध्वमर्थसंशयमादाय वक्ष्यमाणस्य व्यभिचारस्यानवकाश इति तत्त्वं एवमपीति उक्तरीत्यान्यायमतेऽसिद्धिवारणेपीत्यर्थः परमते सिद्धिरेवेति योजना ग्रहणस्मरणात्मकत्वेन धर्म्मिण्युभवतद्ग्रहीतासंसर्गककोटिद्वयस्मरणात्मक

कु·प्रि·टी·ग·

८७

ज्ञानद्वयरूपत्वेन कोटिद्वयस्मृतेः अग्रिमक्षणे प्रामाण्याश्रयद्वितीयक्षणो द्वितीयक्षणस्य व स्वाश्रयद्वितीयक्षण एव संशयापातात् प्रामाण्यसंशयसत्त्वात् तृतीयक्षणे कोटिस्मरणास
त्त्वेऽपि धर्मिज्ञानासत्त्वेन धर्मिज्ञानसहितकोटिद्वयस्मरणरूपसंशयस्य तदानीमवृत्तेरिति भावः। कोटिस्मृतिसत्त्वादिति स्मृतिरूपव्यवसायात्मकधर्मिज्ञानसहितेत्यादिः। एवं तन्म
ते धर्मिधीसहितकोटिस्मृतेः संशयत्वे संशयसंभवेन प्रामाण्यसंशयसंभवेनाग्रिमक्षणे प्रामाण्यसंशयानन्तरक्षणे व्यवसायप्रत्यक्षणापेक्षापातात् तृतीये अर्थसंशयादिति अप्रामा
ण्यसंशयविषयतया अर्थनिश्चयस्य तद्विरोधित्वादिति भावः। द्वितीयक्षणजातप्रामाण्याप्रामाण्यस्मृतेः प्रामाण्यसंशयत्वेनार्थसंशयहेतुत्वे विप्रतीवृत्तिरूपधर्मिज्ञानसहि
तार्थतद्वत्तातद्वत्त्वरूपकोटिस्मृतिरूपसंशयो न तृतीयक्षणवृत्तिः संभवति कोटिस्मृतिधर्मिज्ञानयोर्युगपदनुत्पत्तेः पूर्वधर्मिज्ञानस्य तदानीं विनाशेन तदाश्रयतृतीयक्षणो
त्पन्नाभावः। कोटिस्मृतेः संशयत्वानिर्वाहात् न च प्रामाण्याप्रामाण्यकोटिद्वयोपस्थितिरेव तदुभयघटकघटत्वतदभावोपस्थितिरूपेति तत्सहिततदनन्तरक्षणजातधर्मिज्ञा
नस्य संशयत्वापातात् तृतीयक्षणेऽर्थसंशयसंभव इति वाच्यं घटत्वादिघटितप्रामाण्याद्युपस्थितेर्घटत्वादेस्तद्घटकतया भाने विशिष्टातन्त्र्येण भानाभावात् तत्स्वातन्त्र्येण कोटिद्वयोपस्थितेरेव
च संशयतया प्रामाण्याद्युपस्थितिरूपघटत्वाद्युपस्थितिमादाय धर्मिज्ञानस्य घटत्वादिसंशयानात्मकत्वादिति समाधत्ते नेत्यादिना अर्थतद्वत्तातद्वत्त्वकोट्युपस्थितिरिति तृती

श्रीराम·

८

पक्षताज्ञाते धर्म्मिधीसाहित्ये नार्थसंशयनिर्वाहिकेत्यादिः। तादृशपाक्षस्यतेः संशयनिर्वाहकत्वमस्मन्मते तज्जनकतया परमते तच्छरीरघटकतयाग्रेऽस्मन्मत इवेति दृष्टांतसंगतिः
स्यात्तं चेत्तार्थतद्वत्ताद्यविषयत्वादिति इतरविशेषणतात्पर्याभानमेव स्यात्तं चेत्ताभानमिति भावः। इदमापाततः प्रामाण्यांतर्गत तथात्वे तत्र कोटिविषयकोपस्थितौ समूहालंबन
रूपायां विशेष्यतयापि तत्कोटिभानसंभवेन तत्स्यात्स्यात्तं चेत्ताकोटिद्वयविषयकत्वसंभवात् न हि तद्वत्प्रकारितात्तदुपस्थितिः स्वतंत्रतदुपस्थितिः किंतु प्रकारतान्यूनतेह्विषय
ताशालुपस्थितिरेवेति तथा चाप्रामाण्यज्ञानाभावविशिष्टस्याप्रयावधानमिवेशे नैवापंचमिचार उद्धरणीय इति तत्त्वं अस्मन्मते उक्तं स्वतंत्रकोट्युपस्थितिपर्यंतस्य संश
यानुपयोगित्वमुत्पाद्यति त्वस्मन्मते त्विति गौरवादिति एतदुपलक्षणं धारावाहिकविशिष्टबुद्ध्यनुपपत्तिरपि दूष्या तन्मते तु स्वातंत्र्यस्य संशयानुपयोगे कोटिद्वयवान् अ
वक्रपटवास्थायमिति ज्ञानस्यरकत्वादिसंशयत्वापत्तेस्तस्य तदुपयोगितेति बोध्यं नाव्यवहितोत्तरक्षणोऽर्थसंशय इति न तृतीयक्षणेऽर्थसंशयनिर्वाह इत्यर्थः तत्क्षणे
तृतीयक्षण एव स्वतंत्रकोटिस्मरणात् स्वतंत्रकोटिस्मरणस्योपगंतव्यत्वात् तादाधर्म्मिज्ञानसामग्रीविरहादिति तदानीं धर्म्मिज्ञानोत्पादिकायाः सामग्र्या विरहादित्यर्थः ज्ञा
नद्वयस्ययुगपदनुत्पादादित्यादिः तादृशस्यतेधर्म्मिविषयकसमूहालंबनस्यैकज्ञानत्वमाशंक्याग्रे निराकरणीयं न तु परमते धर्म्मिज्ञानकोट्युपस्थित्योः संशयत्ववदस्माकं

तयोः संशयजनकतया प्रामाण्यसंशयेन स्वानंतरक्षणे संशयजननानुपपत्तेः प्रामाण्यसंशयस्यार्थसंशयजनककोटिद्वयोपस्थितिरूपत्वेन कोट्युपस्थित्यवधानपेक्षितत्वे
पि प्रामाण्यसंशयानंतरज्ञातत्वपुरोवर्त्तिरूपधर्मिज्ञानापेक्षया विलंबादित्याशंक्य प्रामाण्यसंशयस्य तज्जनककोट्युपस्थितेर्वा धर्मिविषयकसमूहालंबनरूपतासंभवेन सर्व
त्र प्रामाण्यसंशयोत्तरधर्मिज्ञानापेक्षितत्वे समाधत्ते अस्माकन्त्विति आत्मनिष्ठेत्यस्य स्वतंत्रमनोग्राह्यआत्माहाविति यावत् अर्थे अर्थसंशयविशेष्ये सति अनुभवरूपायाः ज्ञान
धर्मिकप्रामाण्यसंशयात्मकसमूहालंबनरूपायाः अत एवाद्ये अर्थसंशयविशेष्ये सति स्मृतिरूपायाः प्रामाण्यसंशयजनककोटिस्मृतिरूपायाः धर्मिधियः प्रामाण्यसंशयो
त्पादक्षणसंभवात् चतुर्थक्षणेऽव्यवसायोपस्थितिक्षणावधिके यत्र द्वयोर्न समूहालंबनधर्मिज्ञानरूपता तत्र प्रामाण्यसंशयाहितार्थसंशयोत्तरक्षणोपस्थितिक्षणोऽपि तु तत्राशस
णा एवेत्याह यत्र चेति न तद्द्वयसंभवः उभयोः प्रामाण्यसंशयतज्जनककोट्योः न समूहालंबनधर्मिज्ञानत्वसंभवः एवंप्रकार इति यथाभावमते संशयजनककोटिस्मृते
र्धर्मिज्ञानता तथा गुरुमतेऽपि संशयपदार्थांतर्गततयाऽवसायाद्वितीयक्षणोत्पन्नप्रामाण्याप्रामाण्योपस्थितिरूपप्रामाण्यसंशयानंतरक्षणाज्ञातस्वतंत्रार्थतदभावोपस्थिते
रर्थसंशयधर्मिज्ञानरूपतेति प्रकार इत्यर्थः तथा च तृतीयक्षणवृत्तिधर्मिज्ञानसहिततादृशकोट्युपस्थितिरूपसंशयविषयेऽर्थे तन्मतेऽव्यभिचार इति भावः समाधत्ते इति अ

श्रीरम
९८

गृहीतोऽत्र संसर्गो ययोस्तादृशतादृशधर्म्मधर्म्मिविषयकैकज्ञानस्यैव विशिष्टज्ञानत्वपेक्षार्थः एवं क्रमेणावैशिष्ट्यावगाहित्वापाविविशिष्टज्ञानरूपतापेक्षणा एतत्त्वव्यवच्छेदकोटिस्म
तेः स्वतंत्रकोटिस्मृतेः स्मृतिरूपधर्म्मिज्ञानतापाधर्म्मिविषयकस्मरणाभेदेऽन्यथाख्यायोपयो गुरूणामन्यथाख्यातिस्वीकारापत्त्या धर्म्मिणि बाधितकोटिविशिष्टबुद्धेरेवान्यथा
ख्यातित्वात्तादृशबुद्धेरेव गुरुभिरनभ्युपगमादिति भावः तदनंतरमेव धर्म्मिधीसमयादिति उक्तस्थले स्वतंत्रकोट्युपस्थित्यनंतरमेव तैर्धर्म्मिज्ञानस्योपगंतव्यत्वादित्यर्थः तथा च तत्तृ
तीयक्षणे धर्म्मिधीसहितकोट्युपस्थितिरूपसंशय इति भावः नचागृहीतासंसर्गकधर्म्मधर्म्मिविषयकसमूहालंबनस्मरणादेरनुभवसिद्धत्वापापरस्परधर्म्मधर्म्मिभावावगाहि
ताया विशिष्टज्ञानलक्षणेऽवश्यं प्रवेशनीयतया तच्छून्यबाधितकोटिविषयकसमूहालंबनधर्म्मिधियः पूर्वमनभ्युपगमात्तादृशसंशयविषयत्वापाऽर्थे व्यभिचारो दुर्वार एव
वेति वाच्यं धर्म्मधर्म्मिणोर्विशेषविशेषणाविशेष्यतायास्वविषयतारूपाकांक्षयैव समूहालंबनव्यवच्छेदोपपत्तौ धर्म्मधर्म्मिभावावगाहिताया विशिष्टज्ञाने त्वनभ्युपगमा
त् गतस्य विशिष्टज्ञानत्वाघटकत्वात् संशयत्वमपि कोटिद्वयस्य कांक्षसधर्म्मिज्ञानत्वं तथा च स्वतंत्रकोटिद्वयस्मृतेर्धर्म्मिविषयकत्वेपि तत्र कोटिद्वयधर्म्मिणोः साकांक्षत्वेऽन्य
थाख्यात्यापत्त्याऽसंसृष्टधर्म्मधर्म्मिणोरेकज्ञानविषययोः साकांक्षत्वानभ्युपगमे तद्घटितसंशयत्वस्यापि तत्र दुर्घटत्वेन व्यभिचारानवकाशात् न चैवमपि व्यवसायद्वि

तीयक्षणावृत्तिसंशयाधीनस्मरत्वं च विषयतदभावोपस्थितिधर्म्मिज्ञानोभयात्मकविषयसंशयस्यव्यवसायोत्पत्तिचतुर्थक्षणोत्पन्नैः तादृशक्षणास्यव्यवसायिंकुरणाद्वि
तीयक्षणापेक्षयातृतीयत्वेन तन्मतेऽव्यभिचारो दुर्वारः एवेति वाच्यं एतत्कल्पे तादृशदोषस्यालोकक्षतैव वक्ष्यमाणत्वात् ननु तादृशप्रामाण्यसंशयविषयत्वप्रामाण्यघटकी
भूते तत्तत्संशये कोटितावच्छेदकघटकतत्प्रामाण्यसमानेऽर्थेऽयं घटः स्यादित्यवसायतत्तीयक्षणावृत्तित्वावच्छिन्नधर्म्मिकचैत्रीयत्वादिकोटिकसंशयविषये घटत्वादिमति सा
दिप्रामाण्याश्रययावज्ज्ञानग्राह्यघटत्वादौ एतत्क्षणावृत्तित्वे च ज्ञानमितिवाक्यजन्येतदात्मकतादृशज्ञानविषयके तत्तीयक्षणावृत्तितादृशज्ञानत्ववत्तीत्यादिप्रामाण्यसंशय
धर्म्मिणि तादृशप्रामाण्याश्रययावज्ज्ञानग्राह्ये तादृशज्ञाने च व्यभिचार इत्यत आह विषयत्वमिति कोटित्वमिति मुख्यविशेष्यतानिरूपितधर्म्मितावच्छेदकतान्यप्रकारकार
कत्वमित्यर्थः न चैवं अयं घट इत्यादिव्यवसायोत्तरतृतीयक्षणावृत्तिरयं घटः स पटो न वेत्यादिसंशयस्य प्रकारतावति घटत्वादौ व्यभिचारवारणाय संशयत्वविशिष्टनिरूपितता
दृशविषयत्वं विवक्षणीयं तथा च निरुक्तकोटित्वनिवेशनमफलमित्यत आह शाविषयत्वरूपयथाश्रुत एव निर्भरं न करोतीति यद्वेति धर्म्म्यंशे धर्म्मांशे संशयाभावेन संशय
व्यवहारादिविरहेणासंशयत्वविशिष्टनिरूपितविषयताया धर्म्मादौ विरहादिति शेषः यथाश्रुतमेवेति विवक्षितमिति शेषः विशिष्टवैशिष्ट्यविवक्षयासंशयत्वविशिष्ट

निरूपितत्वस्यापि यथाश्रुतशब्दादेर्लाभादिति अनतिप्रसंगादिति तद्विशेष्यप्रकारतानिरूपितधर्म्मितावच्छेदकतापन्ननिष्ठधर्म्मितावच्छेदकतानिरूपकतत्प्रकारकताकत्वरूपसंशयत्वेन तादृशज्ञाननिष्ठप्रकारतारूपविषयत्वस्यैव निरूपकतया धर्म्मादिविषयतायास्तद्विशिष्टनिरूपितत्वाभावादिति भावः एवमपि व्यवसाये यदवच्छिन्ने धर्म्मिता घटत्वादेः प्रकारता व्यवसायाव्यवहितोत्तरक्षणेऽपि तदन्यधर्म्मावच्छिन्ने धर्म्मिता घटत्वादेः संशयात्तद्विषयतामादाय व्यभिचार इति चेत् ग्रंथकृतैव समाधास्यते अत्र प्रपंचात् तत्समाधानप्रकारः घटत्ववति घटत्वप्रकारकत्वादिकं न पुरोवर्त्तित्वविशिष्टविशेष्यकघटत्वप्रकारकत्वावच्छिन्नेन तदाश्रययावद्व्यक्त्यं यत्तदाश्रयनिष्ठयाधिकरणक्षणाव्यवहितोत्तरक्षणे तदवच्छिन्नधर्म्मितासंदिह्यमानत्वादित्येवानुमेयं पुरोवर्त्तित्वविशिष्टविषयकं यद्घटत्ववतीत्यादेशाश्रयज्ञानं तेनोपदर्शितधर्म्मावच्छिन्नेन तद्ग्रहान्नसिद्धसाधनमिति तादृशज्ञानमात्रेणाश्रयत्वं परित्यज्य उक्तधर्म्मितावच्छेदकधर्म्माश्रयत्वेन ग्राहकस्य साध्ये निवेशः यद्यद्धर्म्माश्रयनिष्ठयाधिकरणक्षणाव्यवहितोत्तरक्षणे यद्धर्म्मावच्छिन्नधर्म्मितासंदिह्यते तत्तदाश्रययावद्भिन्नतद्धर्म्मावच्छिन्नेन गृह्यत इति सामान्यतो व्याप्तिः यद्यप्युक्तसाध्यसाधनयोर्विशेषव्याप्तिज्ञानावपि अप्रमात्वोपेतयोः सत्त्वेन न तद्दृष्टान्तसंगतिः व्यवसायोत्तरवर्त्तीयक्षणे व्यवसाये संदिह्यमाने घटत्वादौ व्यभिचारवारकतया साध्येऽवच्छिन्नइत्यंतेन ग्रहणधर्म्मितानिवेशसार्थक्यं चोपपद्यते तथापि न्यायमते पुरोवर्त्तिनि घटत्वप्रकारकत्वा

प्र·मि·टी·ग·
९०

धवच्छिन्ने तदाश्रययावद्वृत्त्यन्यत्वस्य क्वचिदप्यसत्त्वेन व्यभिचाराप्रसक्तौ हेतुविशेषणावैयर्थ्यं स्यादिति सामान्यव्याप्त्यादरः तथा सतीदंत्वावच्छिन्नविशेष्यकघटत्वप्रकारक
त्वाश्रयनिश्चयोत्तराव्यवहितक्षणोऽइदंत्वावच्छिन्नधर्म्मिणि संदिह्यमाने घटत्वे इदंत्वावच्छिन्नविशेष्यकघटत्वप्रकारकत्वाश्रययावद्वृत्तिरिदंत्वावच्छिन्ने धर्म्मिणि गृह्यमाणोऽभाव
स्वरूपसाध्यासत्त्वेन व्यभिचारवारकतयाऽव्यवधानविशेषणस्यैवंरीत्या विशेषणान्तरमपि सार्थक्यसंभवः एवंच सति वस्त्रायं घट इत्यादिनिश्चयाव्यवहितोत्तरवर्त्तिनो अ
यं जातिमानुरेत्यादिसंशयस्य विषये घटत्वादौ व्यभिचारवारणाय कोटितावच्छेदकधर्म्मो येन रूपेण संदिह्यमानं यत्र तत्तेन रूपेण न गृह्यत इति सामान्यव्याप्तौ निवेश्यप्रामा
ण्यत्वेन प्रामाण्यस्याग्राह्यत्वसाध्यं एवं प्रकारतावच्छेदकसंबंधस्यापि निवेशो बोध्यः अथ पुरोवर्त्तिविशेष्यकघटत्वप्रकारकत्वाद्यवच्छिन्ने तदाश्रययावद्वृत्त्यन्यत्वस्य प्रतियोगि
नो न्यायमतेऽप्रसिद्ध्या तन्मते तदभावरूपपर्य्यवसितसाध्याप्रसिद्धिः गृहीतत्वाद्याश्रयनिश्चयाव्यवहितोत्तरसंशयविषयत्वं घटत्वादावस्ति तदाश्रययावद्वृत्त्यन्यत्वं च सर्वमत एवा
प्रसिद्धमिति न तत्र साध्यसत्त्वमिति सामान्यव्याप्तिभंगः अथ यत्र यद्धर्म्माश्रयनिश्चयाव्यवहितोत्तरक्षणो यद्धर्म्मावच्छिन्ने येन रूपेण संदिह्यते तत्र तद्धर्म्मावच्छिन्नविशेष्यतानिरूपित
